CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपि नायिकायाः सौभाग्योद्रेकं निरूपयन्नाशीरूपं मंगलमाचरति। पद्मेति। मधु
सूदनस्य उरः हृदयं वा युष्माकं प्रियं वांछितं अनुपूरयतु संपूर्णं करोतु। प्रतिक्षणं द
दातिवित्यर्थः। निसविलासासक्तत्वात्। तद्विशेषणविशिष्टस्य तस्य दातृत्वसामर्थ्यं
वांछतामपि तत्प्रियाणां तदेवरसानुभवनमिति ध्वनितं मधुररसास्वादलोपस्य
न मधुसूदनपदोपादाने॥ कीदृशं उरः पद्मानि विद्यंते यस्यां सा पद्मा। अर्शआदिभ्यो
अच् इत्यच् पद्मगुणयोगाच्च सौकुमार्यपद्मेति पद्मकोटि सौगंध्यवती पद्मा सौभाग्य
परिमलाख्यापनाच्च सौकुमार्यसौंदर्यादिगुणेपीति। तस्याः पद्मायाः पद्मिन्याः श्रीराधा
याः याः पयोधरतटी स्तनप्रांतः तस्याः परिरंभेण आलिंगनेन ल

पद्मायपयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमरो मधुसूदनस्य।
व्यक्तानुरागमिव खेलदनंगखेदस्वेदांबुपूरमनुपूरयतु प्रियं वः॥१॥

लग्नं यत्काश्मीरं कुंकुमं तेन मुद्रितं मुद्राचिह्नविशेषयुक्तं मित्यर्थः। इदं मधुसूदनस्य
हृदयं ममैवनत्वन्यस्येति ख्यापनाय निजस्तनतटीलिप्तकाश्मीरेण मुद्रेव दत्तेति भावः।
तथा चापयोधरयोस्तटीपरिरंभेण नायिकायाः वामताख्यापनेन तस्याः वैदग्धी प्र
तिपाद्यते। पुनः कीदृशं खेलन् क्रीडां कुर्वन् अनंगेन कंदर्पस्तस्मात् खेदः आयासः सुरत
श्रमः तेन यत्स्वेदांबु प्रस्वेदजलं तस्य पूरः प्रवाहो यत्र तादृशं। एतेन काश्मीरस्य स्वेदसं
बंधेन मुद्रायोग्यत्वं संभोगानिद्रायित्वं च ध्वनितं कीदृशमिव व्यक्तः नुरागमिव व्यक्तः
प्रगटीभूतोनुरागः स्नेहो यत्र तादृशमिव तद्विषयकानुरागाधिक्यात् अंतरे समावेशाभा
वात् कुंकुमरागव्याजेन अनुरागो बहिर्निस्सृत इवेति भावः। मुद्रा संजातास्येति मुद्रितामि
ति तारकादित्वादितच् पूरो जलप्रवाहे स्यात् प्राणसंक्षुद्धि वातयोरिति विश्वः। स्नात्स्त
नाद्यौ पयोधरौ विति च। कंदर्पो दर्पकोनंग इत्यमरः। पद्मिनी लक्षणं॥ कमलमु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीत० १५॥ कुलमहीकुलराजावगंधिःसुरतपयसियस्याःसौरभंदिव्यमंगो।चकितमृगदृशा गोविंद० ॥१५॥
भ्रांतरक्तेचनेत्रेकुचयुगलमनर्घ्यंश्रीफलश्रीविडंबि॥१॥तिलकुसुमसमानां
बिभ्रतीनासिकांचद्विजगुरुसुरपूजाश्रद्धधानासदैव।कुवलयदलकांतिःकापि
चांपेयगौरीविकचकमलकोशाकारकामातपत्रा॥२॥व्रजतिमृदुसलीलंराज
हंसीवतन्वीत्रिवलिकलितमध्याहंसवाणीसुवेषा।मृदुशुचिलघुभुंक्तेमानिनी
गाढलज्जाप्रबलकुसुमवासासावल्लभापद्मिनीस्यादिति॥३॥तस्याअलौकिकगुण
नांवर्णनान्नाक्यसादेंतेलोकप्राप्तत्वेनकथ्यंतेतिसिद्धांतः।दी।एतावताग्रंथे
नाभिधेयप्रयोजनप्रयोजयप्रयोजनकेलिवर्णनोयुक्तनायकगुणप्रतिपादनपु
नःसराणिमंगलानिविधायकविःशृंगाररसप्रधानभगवत्केलिवर्णनंचिकीर्षुः
तत्रप्रस्तावसरसंक्षिप्तंकेलिंनिचाहविशेषक्रीडामारब्धुमिच्छतोःपरमप्रियतमयोः
कदाचिन्निमिषमात्रमपिविप्रलंभासह्यजनितोःश्रीराधामोहनयोःसंभोगरसपोष
णायरसयोगादेवविप्रलंभाख्यशृंगाररसाविर्भावेजातेप्रथमेतावच्छृंगाररस
सर्वस्वभूतायाःनायिकायाःचरितानिवर्णयितुंप्रस्तावयतिवसंतेसादि।तत्रसं
भोगोत्कर्षंप्रतिविप्रलंभस्योपादानेऽलंकारिकाः।संभोगोविप्रलंभेननविना
पुष्टिमश्नुते।कषायितेहिवस्त्रादौभूयान्रागोभिजायतइति।किंचरसयोगादि
तियदुक्तंनशृंगाररसानुभाविभिछाभिछामीतिनिसेच्छानचिकीर्षोक
त्तिसत्वमिश्वरत्वंमिश्वरत्वमितितस्यभगवतःनिसेच्छयेवरसनियामकत्वे
नापिनिसानंतशक्तिमतस्तस्यनस्यातंत्वभगइतिसिद्धांतः।गकचाससस
स्यकामत्वाति॥एवंनिसेच्छयाकालव्यवधानमपिनिरस्तं॥वसंतेसादि

Dr. Urmila Sharma Collection, Varanasi

श्लोकार्थस्तु। कदाचित्सहचरितुल्यव्यसनासखीच संतेसटसंरसोन्वेषसहि
तंयथास्यादेवंराधोद्ददंवक्ष्यमाणंनुचेडवाच कीदृशी। अवयवैरनंगैरूपलक्षि
तां। कीदृशैरवयवैः। वासंती कुसुमसुखैः कुमारैः माधवीलतापुष्पवत्कोमलैः
नतोपि मृदुलैरित्यर्थः। मार्दवं कोमलस्यापि स्पर्शासहदनुभावी तनुरेव ततोऽप्य
तद्यथा। अभिनवनवमल्लिकामयं सा न्नायनवरं ननु राधिकापि न्द्रोर्ष्वी। नकुसुमप
दलं दत्तापि जाले सुतनुतनोस्तनुरेव सत्राणसीदिति। जल्पाग्लानिप्रापसर्वः पुनः
कीदृशी कांतारे महारण्ये भ्रमंती। तत्र हेतुगर्भितं विशेषणमह। बहुविहितेति। बहु
वारंवारं विहितं कृतं कृष्णस्यानुसरणमन्वेषणं।

वसंतवासतीकुसुम[illegible]कुमारैरवयवैर्भ्रमंतीकांतारे बहुविहि
तकृष्णानुसरणां। अमंदकंदर्पज्वरजनितचिंताकुलतया च
लद्बाधां राधां सरलमिदमूचे सहचरी॥७॥

यया तादृशी तत्रापि हेतुगर्भं विशेषणमाह। कंदर्पज्वरेण जनिता या चिंता तत्कृता
याया कुलता तया। आमंदमधिकं यथास्यादेवं चलद्बाधा चर्धमापीडां। अवयवै रि
त्र जरतोभिस्तापसद्दत्तिच द्वितीयेषणे तृतीया। महारण्ये नाभिलाषचिंतारूपेदशोक
थिते। तल्लक्षणं। अभिलाषः स्पृहा तत्र कामे सर्वांगसुंदरे। दृष्टे श्रुते वा तत्रापि विस्म
यानंदसाध्वसादृ तियथादशारूपके कथं सवल्लभः प्राप्य किं कुर्यात्तस्य सिद्ध
सकथं स्यादसौ वशाद् इति चिंता प्रवेचयेति शृंगारतिलके। सुकुमारावयवै
कांतारे भ्रमंतीमित्यनेनाभिसारेऽनुरागसो स्वं दर्शितं। तद्यथा॥

CC0. In Public Domain, Digitizagtion by eGangotri

चित्रोत्कीर्णादपि विषधराद्भीतिभाजो रजन्यां किं वा ब्रूमस्त्वदभिसरणे साह
सं माधवास्याः ध्वांते यां सा पदन्निनिम्नतंराधया सत्रकान्तात्रासा साणिः फणि
फणि फणार नरोधां व्यथायि॥१॥ यथा वा। द्विस्त्रे केलिसरोरुहं त्रिचतुरे धम्मि
ल्ल मल्लीस्रजं कंठान्मौक्तिकमालिकां तनदनु चत्वक्कापदे पंचषैः। कृष्णप्रेम विघूर्णितं
तदतयादूराभिसारातुरा तन्वंगी निरूपायमध्वनि परं श्रेणीभरं निंदिति। अथवा। अनं
दं कंदर्पज्वरजनितचिंताकुलतयां बहुवित्तं कृष्णेनानुसरणं यस्याः तादृशी। अतो कांतावे
त्तमंतीमित्यर्थः॥७॥ किमूचे रसनआह। ललितेत्यादि। गीतस्य। वसंतरागः। पनित्ता
लः। नयोर्लक्षणं। शिखंडिबर्हाच्चयबंधचूडः पुष्णान् पिकं चूतलतांकुरेण प्रमनुदाया
समनंग।
ललितलवंगलतापरिशीलनकोमलमलयसमीरे॥ मधु
करनिकरकरंबितकोकिलकूजितकुंजकुटिरे॥१॥
मूर्तिमंतो मत्तंगास्य वसंतराग इति। लघुद्रुतौ तालश्चेति। गीतार्थस्तु। सबाधां महो
षधं वचः सखी च किं। हे सखि। राधे। इह अत्र वश्रीमवृंदावने सरसवसंते रसः शृंगा
रो द्वोधकस्यास्सर पश्चासौ वसंतश्चैश्च सरसवसंतस्तस्मिन् तादृशे समये हरिः।
श्रीकृष्ण विहरति क्रीडति। कसति। समं सत्रोभसः कैर्वा युवतिजनेन सतिसति
किं भूते वसंते। मिलनार्थं हितुगर्भविन्नोषणं विरहिजनस्य दुरंतो नइ तिन अपि
तु दुरंत एव ति। का का दुरंते दारूणे दुखं नांतः स्मापिर्यस्य। तादृशो या निर
वधा वित्यर्थः। अथवा अंते जीवनं तेन समं दुरं नेति। अथवाह रिहि सरसवसंते

Dr. Urmila Sharma Collection, Varanasi

बहुप्रेमाद्यभिसृतेनतद्भूयाद्युन्मादित्ते युवतिजने गोपांगनांगणे नृत्यति सत्यपि त्व
यासहनृत्यमिच्छुः। ताभिः समं न विहरति। केचित्तु हरिरिह सरसवसंते युवतिज
नसमं विहरति नृत्यति चेति व्याकुर्वंति तन्न राधाभिसाराय सख्या असूयाहेतुकथना
न्न संगच्छते। ननु प्रथमानुरागः स्यात्। सोपि न घटते। पूर्वक्रीडावर्णनलाभात्। वक्ष्यति
च रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासमिति। अतोत्र कृतव्या
ख्यानमेव सिद्धं। प्रकृतमनुसरामः ताभिः समं न विहरतीत्यत्र हेतुः विरहिजनस्य च
द्विरहितसकृष्णलक्षणजनस्य दुरंते। ताश्च वसंतश्च सांचिनाचन सविलासो सा
हृन्नदाभवंतीत्यर्थः अतएव न त्वामेव कामयंतीति भावः। विहरति स ने मापि त्रि राधान्वे
विहरति हरिरिह सरसवसंते। नृत्यति युवतिजनेन समं सखि
विरहिजनस्य दुरंते॥ध्रु॥
हरउच्यते। मेलनसंकोचं परिहाराय सामान्यनारीणां संगरस्फुतः। न भाव यदि त्वं प्रियत
मेनानुसरिष्यसि तदाऽयं वसंतस्त्वयापि दुरंतो भविष्यतीति ध्वनितं समं सहेत्यमरः। ध्रु
वपदमिदं। अत्र हादन्ना। लक्षणानि। चिता निसृष्टार्था दूतिसएवा तदुक्तं। प्रवदितकुलाल
दक्षा गूढमंत्रा दृढप्रिया। सतंत्री विधवा दासी दुष्टा प्रव्रजिता सखी। माला कारादिना
रीचकार्यदूती दृश्सिद्धये। तस्या लक्षणानि। यथा। कालचित्तो धमाभिज्ञा सुवेषा
दृढमित्रता। दृष्टा घ्राणस्य त्रीलाच दक्षाचापल्यवर्जिता। अक्षुद्रा वाग्मि नु हृदि भ्राप्तात्वास्या
हादत्राग्निता किंचा। विलासिनोश्च स्वांतस्या स्वधीचिज्ञायते यस्यां अनुरूपाचि मोचनिसा
कलरमानकूलकृत्वा। निरिशार्थनि साक्षेया कौतुहलसमन्विते ति। तथा च सतत चिंतातिदूनाकेमणि

CC0. In Public Domain, Digitizagtion by eGangotri

पासाहनं१अर्थदर्शनं२गुणकथनं३विस्तरणं४तदनुरागख्यापनं५कलानिवेदनं६श्रौ
र्यप्रगटनं७बहुमित्रता८सुचेष्टता९दुःखसहिष्णुता१०मधुरवाग्वादिता११गूढमंत्रि
ता१२सौरभ्यवत्ता१३स्वच्छंदानुवर्तिता१४उपायज्ञता१५कालज्ञानवेदिता१६देशविवेकि
ता१७स्वभावज्ञता१८सर्वकर्मकुशलता१९दोषाच्छादनं२०गुणनिरूपणं२१सौदर्य
शंसा२२पिशुनवाक्यराहित्यं२३मृदुभाषणं२४अर्थप्रदाकथनं२५विचेष्टितासत्तं२६
परनष्टज्ञानं चेति२७ तत्रकालज्ञतामोसाहनार्थंवादर्शनादिगुणान्प्रदर्शयति वसं
तस्यसरसतांप्राह। कीदृशे वसंते। ललितामनोहरायालवंगलतिका तस्याः
परिशीलनेनपरितःशीलनंआलिंगनंतेन कोमलो मृदुलो मलयसमीरो मलया
चलसंबंधीवायुः यत्र तादृशे। एतेनवासो

उन्मदमदनमनोरथपथिकवधूजनिनतविलापे। अलिकुल
संकुलकुसुमसमूहनिराकुलबकुलकलापे॥२॥ वि०॥

स्तैविंध्यमुक्तं।लवंगलतानायिकायोगात्समीरस्योदीपनताकथिता।अन्यांश्चोदीपनविभा
वानुदर्शयति।पुनः कीदृशे वसंते मधुकरनिकरणभ्रमरसमूहेनकरंवितामिश्रितायंको
किलास्तैः कुजितः मधुरशब्दयुक्तः कृतः कुंजएवकुटीरोल्पाकुटी यत्र तादृशे।शीलनालिंगनेस
मेनिविश्वः। समीरमारुतमरुदिसमरः। मधुव्रतो मधुकरमतुलिहमधुपालनरति स्तामोप
निकरव्रातवारसंघातसंचयास्सपि।मिश्रितकरंबितमिति वा।अल्पाकुटीकुटीरस्सपि।
वसंतस्यदुरंततामाह।उन्मदो उद्धतो मदनो यत्र।उद्धतो मदनो यस्मिन्निति वा। तादृशोमनोर
थो येषां तादृशायेपथिकानां च वधूजनानेर्जनितोविलापो यत्र तादृशे। पुनः कीदृशे अलिकुलैः
भ्रमरसमूहैः संकुलो व्याप्तो यः कुसुमसमूहस्तेन निराकुलो निःशेषाणां कुला व्याकुलो बकुलकला
पः केसरसमूहो यत्र तादृशे।अथवा तादृशो बकुल एव कलापो भूषणं यस्याः कलापो स्मरतूणीरोवा।

संकुलं वाल्मरासे विलसत्काकैवर्तस्यपीतिलिरवः केसर
वकुलस्य भरः कलापो भूषणं बहुल्य गीर सहतेत्रिवक्षा॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशे। मृगमदस्य कस्तूरिकायाः सौरभं रभसः सौरभवेगस्तस्य वशंवदः आप्यायनवा
दिनी नवदलमाला नूतनपत्रपंक्तिर्येषां तादृशाः तमालाः यत्र तादृशे। पुनः कीदृशे। युवजना
नां हृदयं विदारयंतीति युवजनहृदयविदारणास्तादृशा ये मनसिजस्य कामस्य नखाः तेषा
मिव रुचिर्दीप्तिर्येषां तादृशा ये किंशुकाः पलाशाः कुसुमानि तेषां जाले समूहो यत्र तादृशे। किं
शुकजालानि पलाशकलिका इत्यर्थः। अत्र पलाशकोरकस्य वक्रत्वेनाकारेण च हृदयविदा
रणाद्रुधिरारक्तमनसिजनखस्य सादृश्यं। नखसौंदर्यं च कथितं। मृगनाभिर्मृगमदः कस्तू
री चेत्यमरः। रभसो वेगहर्षयोरिति विश्वः। रुचिर्मयूखे शोभायामभिषंगाभिलाषयो
रिति च। पलाशे किंशुकः इत्यमरः। जालं गवाक्षआनाये कोरके दंभवृंदयोरिति विश्वः।२। मदन

मृगमदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयवि दा
रणमनसिजनखरुचिकिंशुकजाले। मदनमहीपतिकनकदंडरु
चिकेशरकुसुमविकाशे। मिलितशिलीमुखपाटलिपटलकृतस्मर

स्य यः कनकदंडः सुवर्णघटितछत्रदंडस्तस्येव रुचिर्यस्य तादृशाः केसरस्य नागकेशरपुष्पस्ये
विकाशाः प्रकाशा यत्र तादृशे। अत्र कनककनकदंडशब्देन कनकदंडयुक्तं छत्रमिति वा। महीप
तिशब्दसाहचर्यात्। अथवा। विरहिणां दंडनार्थं दंड एव। पुनः कीदृशे। मिलिताः शिलीमु
खाः भ्रमरा एव बाणा यस्मिन् तादृशा यत्पाटलिपटले पाटलिपुष्पसमूहः तेन कृतं स्मरतू
णस्य कंदर्पतूणीरस्य विलासः शोभा येन यत्र तादृशे। अत्र परमव्याजेन कथनं भ्रमराणां
चितिश्वासमूहे पटलं न तेषु पितृणो पासंग तूणीर निषंगा इषुधिर्द्वयोरित्यमरः।४।
विगलितं विगलितलज्जितं लज्जायस्य तादृशस्य जगतः प्राणगणस्य वि
लोकनेन दर्शनेन तरुणकरुणेः नवीनकरुणरसैः पुष्पविकाशव्याजेन कृतो

CC0. In Public Domain, Digitizagtion by eGangotri

हासो यत्र तादृशो। अत्र हास्यरसस्य श्वेतत्वात् श्वेतपुष्पविकासः साम्यात् यदाह भरतः।
श्वेतहासः प्रकीर्तित इति। अथ च तरुणकरुणे दिसनेन वृंदावनवर्षादीनां निःसतारू
प्यमेव प्रतिपाद्यते। भगवत्प्रियत्वात्तु अथवा। विगलितलज्जितानां जगतां वियो
गिजनानां दर्शनेन संदर्शनेन तरुणैरर्थाद् वियोगिभिः करणं करुणरससहितं य
था स्यात् देवं कृतो हासो यत्र तादृशो। हा विरहिणो वराकाः कष्टं प्राप्नुवंतीति करुणाः
लज्जां हित्वा विलपंती च हास्यस्तेषामिति भावः कलारसानभिज्ञा एव वृद्धाः परमेव्य
वेपि कृतसंचरणाः अतस्तरुणे सुकृते अथवा। विगलिते कोकिलाभिः पक्षिगुणैः
शब्दायमानैः गलितं भुवि सच्चलितं अत एव लज्जितां गच्छंतीति जगत्स्थिककुलैर्विभिः

विगलितलज्जितजगदवलोकनतरुणकृतहासे। विरहि नि
कृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे॥ विहरति०॥ ५॥

ज्जितं च तज्जगच्चेति समासः। तस्यावलोकनेन तरुणैः संयोगिभिः कारुण्येन कृतो हासो
यत्र तादृशे। पुनः कीदृशे। वसंते विरहिणां वियोगिनां निकृंतनाय छेदनाय दारुणं कुंतमु
खाकृति कुंतआयुधविशेषः तस्य मुखमग्रभागस्तस्येवाकृतिर्यस्य तादृशं
यत्केतकं तेन दंतुरिताः व्याप्ताः विषमीकृताः आशा दिशो यत्र तादृशे। क्वचित्के
तकिदंतुरिताशे इति पाठः तदा इकारांतः स्वः क्वचित् ह्रस्वलक्ष्मानुरोधात् सा
कृतह्रस्वेन केतकिशब्देन समर्थनीयाः लज्जिते सत्र नपुंसके भावे क्तः। कृति छ
दन इति ह्रस्वानुबंधो स्तीति केचित्। तस्य लघुर्क प्रत्ययात् तस्य निकृंतनमिति प्र
योगाः। साधुरूणक्रूरसे वृक्ष रूपायां करुणा मतेति विश्वः। प्राचीं स्तु कुनइ स
मरः। निम्नोन्नतिन्या स्यासे दंतुरं कथ्यते बुधैरिति विश्वः। अत्रानुच्छादिशोरिति

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशे। माधविकायाः वासंत्याः परिमलेन सौरभेण ललिते मनोहरे श्लेषेण माध
वस्य यं माधविकांतस्याः परिमर्लेन कांतविमर्दसौरभेण ललिते मनोज्ञे। उक्तंच।
आलिंग्येव प्रियेयाते कामनिर्जितचेतसा। स्फुरत्सत्त्युक्तिरचना माधवीनायिकामता।
माधवशब्देन वसंत एव नायकः। श्रीकृष्णसंगमाप्यतां हस्यति विभावोद्रेककथ
म नेनेति ध्वनितं। पुनः कीदृशे वनमालतिकया नवमल्लिकाल पुष्पे अतिशयेन सौर
भयुक्ते। पुन कीदृशे। मुनिमनसामपि मोहनकारिणि मोहजनके अन्येषां मोहे किंव
क्तव्यमित्यपिशब्दार्थः तथाच मुनिमेव सांमं निवृत्तीनां मानिनां मोहनकारिणीति ध्व
नितं। पुनः कीदृशे तरुणानां विलासयुवजनानां अकारणबंधौ स्वाभाविक मित्र पर
मानंदप्रियइत्यर्थः। नवमालिकजातीति पाठे नवमालिकं नवमालिकाकु

माधवीकापरिमलललितेनवमालिकयातिसुगंधौ॥ मुनिमं
नसामपि मोहनकारि तरुणाकारणबंधौ॥ ध्रु॥ विहरति०॥

समंच जातिश्च तिताभ्यामित्यर्थः। विमर्दोत्थे परिमलो गंधे जनमनोहरे स्यमरः। ध्रु पुनः की
दृशे वसंते स्फुरंति कंपमानो सोभ्यमाना वा या अतिमुक्तलता तस्याः परिरंभेनालिंगनेन मु
कुलितपुलकित मुकुलितं मुकुलं तदेव पुलको रोमांचः तद्युक्तं चूतः आम्रोयत्र तादृशे। अत्र
कांतस्य संगमरसेन सात्विकोद्रेकात् कंपमानायालता नायिका या परिरंभेण चूतनायकस्य
पि रोमोद्गमे नाचेतनयोरपि कामोन्मेषः कथितः ते नवसंतस्यातिदुरंतत्वं कथितं। तथाचा
तिमुक्तपदेनातिशयमुक्तानामपि परिरंभणोत्सुक्यमिति ध्वनितं अतिमुक्तायाः कस्याश्चि
द्वन्माधुर्य्यभराक्रष्टायास्तदुपासनार्थं वृंदावने लतारूपत्वमिति वा। तदा अतिमुक्ता चासौ
लता चेति समासः। अनेनातिमुक्तैः वैकुंठवासिभिरपि श्रीवृंदावनलतोल्लस्यह

Dr. Urmila Sharma Collection, Varanasi

णीयमिस्त्रमाधुर्यसरोनिरापिनः॥ उक्तंच॥ आसामहोचरणरेणुजुषामहंस्यां वृंदावने किम
पिगुल्मलतौषधीनामिति॥ एतावताचसंतस्य सरसतां दुरंततोच्यात्क्रांसेप्रतिक्रीडायास्थान
विशेषमाह॥ वृंदावनेत्यादि॥ वृंदावनाख्ये विपिने हरिः विहरती त्यन्वयः कीदृशे विपिने॥
परिसरे समीपप्रदेशे परितः सर्वतो गतेन यमुनायाजलेन पूते पवित्रे परसरपरिगतंच
तत् यमुनाजलंच तेन पूते यस्मिन्निति वा॥ पावनस्य यमुनाजलस्याप्यधिकपावनत्वेन किं
वक्तव्यं तस्यावनस्य मित्यर्थः॥ तथाचारसो यः परमो धारः सच्चिदानंदलक्षणः॥ ब्रह्मैसपनिषं
द्रुतेस एव यमुनास्वयमितिवचनात्॥ एवंभूतमहिम्नोपलक्षितायास्तस्यापावनत्वेना
तिमुक्तेः स्पृहणीयत्वं तस्य सिद्धमिति दर्शितं॥ पावनत्वमत्र भागवद्र

स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते॥ वृंदावनविपि
ने परसरपरिगतयमुनाजलपूते॥७॥ श्रीजयदेवभणितमिदमुदयति
हरिचरणस्मृतिसारं॥ सरसवसंतसमयवनवर्णनमनुगतमदनविकारं॥

सविश्वापानुप्रावादुच्यते॥ नतुपापमात्रक्षयादिति॥ वृंदमवतीति वृंदावनं चंपकादि वृंदं गोपीवृंदं
वा॥ भगवत्केलिसुखसंपद्यजानात्॥ अतिमुक्तपंडकः स्याद्वासंती माधवीलते त्यमरः॥ पर्यंतभूः प
रिसर इत्यपि॥७॥ संप्रतिगीतार्थमुपसंहरन् स्वभणितेरुत्कर्षमाह॥ श्रीजयदेवेत्यादि॥ श्री
जयदेवकवेः इदं भणितं उदयति राजते॥ अथवा सुप्तिंयपदिसासुपरस्मैपदं॥ तत्र हेतुः
हरिचरणयोः स्मृतिः स्मरणं तेन सारं श्रेष्ठं॥ अथवा हरिचरणस्मृतिरेव सारो यत्र तत्ता
दृशं॥ पुनः कीदृशं सरसं शृंगाररसप्रधानं वसंतसंबंधिनो वनस्य वर्णनं यत्र तत्ता
दृशं॥ अतएवानुगतमदनविकारं अनुगतः संबद्धोनुस्यूतः मदनस्य विकारो य
त्र तादृशं॥ अथवा॥ मदनः॥ श्रीकृष्णः॥ तस्य विकारः॥ भावोद्रेकः राधाप्र ॥१९॥

CC0. In Public Domain, Digitizagtion by eGangotri

तिसख्यांवर्णनेनअनुगतः यस्मिन् समुदितेतादृशं मदनसंबंधिविकारअनुगतः॥
श्रोतृणांहृदियस्मात दितिवा॥ सरसवसंतसमयवनवर्णनमिसस्य विन्नो षणेना
नुगत मदनविकारमितिवा॥८॥ ॥इतिश्रीगीतगोविंदजयदेवकविसृतकाव्ये
तृतीयप्रबंधः॥ ॥३॥ इदानीवसंतकालीनकाव्येरपिविरहिजनसंतापकत्वमाह॥
दरविदलितेत्यादि॥ इह हि अस्मिन्नेववसंतेगंधवाहोवायुश्चतोदहतिअर्थाद्विरहि
णां॥ किं कुर्वन् कैः दरइषद्विदलिताविकसितावल्लिः मल्लीया मल्लिकालतास्तस्याः
सकाशात् ॥ चंचंतः उद्गच्छंतः येपरागाः पुष्परेणवः ते एवप्रकटिताः पटवासाः पि
ष्टातकाः तैः कीदृशोगंधवाहः॥ केतकीगंधबंधुः॥ केतकीसौरभसहचारीपुनः कीदृशः
प्रसरन्निति दिक्षुसंचरतोअसमबाणस्य

दरविदलितमल्लीवल्लिचंचत्पराग॥ प्रकटितपटवासैर्वासयन्काननानि॥
इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः॥१॥ निबा
स्मरस्य प्राणचप्राणसंदृशः॥ अथवा॥ प्रसरतासमबाणेनप्राणयानयुक्तिसंपन्नोयो
गंधवाहइसेकमेवपदं॥ अथवा॥ किंभूतं चन प्रसरन्॥ आधर्मिनोरथंप्रतिअसेमबाण
प्राणवत्॥ कामस्य जीवितमिवाइत्यर्थदरोव्ययमितिविश्वः॥ परागपुष्परजसीतिच॥
पिष्टातः पटवासकइस्मरः॥ गंधवाहानिलाशुगाइतिच॥ ॥८॥ अद्भुतसागइति॥ श्री
खंडशैलानिलोत्यउयसंबंधीपवनः ईशाचलंईशस्य महादेवस्याचलंपर्वतं हि
मालयंअनुसरइति॥ कस्मादिव॥ अद्रेःमलयस्योसंक्रीडेच संतोयेभुजंगाः सर्पास्तेषां
कवलेनजनितोयः क्लेशःसंतापस्तस्मादिव॥ तर्हि हिमाद्रिकिमिति व्रजतीसआह॥ प्रा
लेयति प्रालेयंतुष्यारस्तसप्लवनमवगाहनंतस्येछया॥ तत्र सर्पैः कवलितोद्गीर्णो
स्यपवनस्यतद्विषसंपर्कादधिकंविरहिणांसंतापकत्वंध्वनितं व स्फुतस्फुदक्षिण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यायोः शीतलत्वात्सुखकरत्वाद्व्यविरहिणां दुःसह परिणामेन स्पर्शयसनं हिमाप्लवनमिसाकोश्च
न केवल मिदमेवदुःसहो वसंतो अपरमपि साह। किंचेति पिकानां कोकिलानां कूहुकूहु रिति
गिरः शब्दाः उन्मीलंति प्रकटी भवंति। कीदृशाः कलोनालाः कलाः अव्यक्त मधुराः उत्तालाः उ
द्भटाः कस्मात् स्निग्ध्या येरसालाः आम्रवृक्षा तेषां मौलयः अग्रभागास्तत्र यानि मुकुलानि तत्
न्यालोक्य वीक्ष्य योह र्षोदय आनंदस्याविर्भावस्तस्मात्। तत्र कश्चिद घुसंगेति पाठः तदा
आद्यय संतरस्यार्थः तुषारस्तु हिनं हिमं प्रालेयं मिहिकाच्येसमरः। अत्रलोहे मकुंडे स्यादुर्भा
चौत्तालउद्भटेतालाः। पिकानां गिरः १७। उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्री
डत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। नीयंते पथिकैः कथंकथमपि ध्यानावं
धानक्षणप्राप्तप्राणसमासमागमसोल्लासैरमी वासराः ॥१७॥

अथ भृङ्गसंगव सद्व्यंगकवल कृत्याहर्षेन्द्राचले प्रालेयप्लवनेच्छयानुसरति
श्रीखंडशैलानिलः। किंचास्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया
दुन्मीलंति कूहुःकूहुः रितिकलो

अथैवं पिचिकरालापि स्यादुत्तालः प्लवंगमेति विश्वः ॥ सं प्रति वसंत दिवसानामपि दुरं
तत्वमाह। उन्मीलदिति। अमी वसंतसंबंधिनो वासराः। दिवसाः पथिकैः कथं कथमपि
महता कष्टेन नीयंते समाप्यंते। कीदृशाः वासराः उद्गीर्णप्रकटीकृतः कर्णज्वरः श्रोतसं
तापो यैस्तादृशाः कैः उन्मीलंति प्रकटी भवंति यानि मधूनि गंधाश्च तेषु लुब्धाः लोल
पा भ्रमरास्तैर्व्याधूताः कंपितायचूतांकुराः आम्रमुकुलानि तेषु क्रीडतां कोकिलानां या
काकल्यः अव्यक्तमधुरध्वनयः तासि संताये कलकलो कोलाहलास्तैः। तदुक्तं वसंतेप
चमं वक्ति कोकिलः इत्ति उद्दीपनविभावोद्दीप्तिः केन प्रकारेण नीयंते इत्यत आह।
ध्यानेति। ध्याने स्वप्रिया चिंतने मदचधाने तत्सरत्ता तेन क्षणं प्राप्तो यैः प्राणस

Dr. Urmila Sharma Collection, Varanasi

मापाजीवितनुल्यासाः कोतायाः समागमरूपोरसस्तस्मादुत्पन्नायंउल्लासात्साहासैः पधि
कविशेषणं वा। कीदृशैः ध्यानवधानेनक्षणंप्राप्तोयः प्राणसमाप्रासमागमरससस्मि
न्नुल्लासोयथातादृशैरिति। अनेनश्रीकृष्णस्यापिप्रियाध्यानेनकष्टनवसंतपासरनिवहि
इतिध्वनितं। काकलीनुकलेसूक्ष्मेध्वनाविप्रभरः कोलाहलः कलकलइतिच॥१०॥एवं
उद्दीपनविभावाद्रीतिः संप्रसन्निभावंदर्शयति। अनेकनारीत्यादि। असौसखीराधि
कांपुनराह पुनः कथितवती किंकुर्वती आराददूरे समक्षं परोक्षं मुरारिमुपदर्शयती कीद
वां अनेकनारीणांपरिरंभसंभ्रमेणआलिंगनादरेणस्फुरन्योमनोहारीविलासः अंगवि
कारः तेनलालसाओत्सुक्यं अथद्विघायांयस्पतोदन्तं॥

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं॥
मुरारिमारादुपदर्शयंत्यसौसखीसमक्षंपुनराहराधिकं॥१॥

अथवा। अनेकनारीणांपरिरंभसंभ्रमेणस्फुरन्चितारूढोभवन्योमनोहारीहरेश्चित्ता
पहरीश्रीराधायाविलासः हासादिलक्षणः तस्मिन्लालसायस्यापरिरंभसंभ्रमः अन्यो
न्यसख्यालिंगनलक्षणाभियोगस्तेनस्मारितश्रीराधाविलासेननतसखीषुलालसंप्रार्थ
भिति। मुरारिमारात् श्रीकृष्णएवकामस्तस्मादनेकनारीणांपरिरंभसंभ्रमेणस्फुरदावि
र्भवन्योमनोहारीविलासस्तेनलालसौत्सुक्यंभावविकारंदर्शयतीसर्वः अनेनतदभि
मरणायतासांभावक्रियानिरूपणेननायकगुणाधिक्यंदर्शितं। वक्ष्यतिचापीनपयो
धरेत्यादिनासंभ्रमेत्रयमिळंतिभयमुद्वेगमदुर्लरायामपिसंभ्रमइति। लालसोला
लस्यापिस्याच्चातन्बातिरेकयोः। औत्सुक्यंचेतिविश्वः। आराद्दूरसमीपयोरिसमरः।
नथासंभ्रमपदोपादनात्लालसमिसनेनचतासामालिंगनापेक्षयातदालिंगनापरा
धिक्यंदर्शितं किंच आरात् किंचिद्दूरे समीपे वा तस्याः प्रसक्षं यथास्यात्तथेति॥११॥

CC0. In Public Domain, Digitizagtion by eGangotri

तदेवगीतेन प्रपंचयति। चंदनेत्यादिना। रामकरीरागेण गीयते यतिताले। रागलक्षणं।।
स्यवर्णत्रनाभ्रा खरभूषणा चले न्निचोलस्तुतनौ वहंती। कांतंपदोपांत मुधिश्रिते पि माने।
चना रामक प्रदिष्टा।। ताललक्षणं प्रागुक्तं। गीतार्थस्तु। हे विलासिनि विलासशीले। इह
श्रीमद्वृंदावने मुग्धवधूनिकरे सुंदरगोपवधूनिचये हरिर्विलसति। क्रीडां करोति। की
रे।क दृशो वधूनिकरे केलिपर क्रीडापरायणे। अत्र मुग्धपदेन हावभावेभिज्ञत्वं केलिपरइत्यनेन
हावाद्यभिज्ञत्वमेव सकलकलाभिज्ञतापेक्षतेति भावः। मुग्धेदं सुंदरमूढयोरिति विश्वः।
विलासो हावविशेषस्तल्लक्षणं। यानस्था।

चंदनचर्चितनिलकलेवरपीतवसनवनमाली केलिचलन्म
णिकुंडलमंडितगंडयुगस्मितशाली।।१।। हरिरिह मुग्धवधू
निकरे विलासिनि विलसति केलिपरे। ध्रु।

नासन्नारीणां नेत्रवक्त्रादिकर्मणां उत्पद्यते विशेषो यः स विलासः प्रकीर्तितइति भरतोक्तेः।
अथवा केलिपरा उत्कटा सर्वातिशायिनी यस्यास्तत्संबोधनं। केलिपरइत्यपि। मुग्धे
अतावपक्षे मुग्धे मुग्धेति नायिकालक्षणान्वितास्तासां निचये हरिः स्वविलास
कौशलैः अखिलनारीमनोहरतीति। सकलकलाकुशलस्य तासु मुग्धासु तादृशहा
वाद्यनुपपत्तास्तयैव तस्याखिलविक्रीडापर्याप्तिस्तामेव कामयतीति। अक्लेशेनोक्तेनात्तथा
नत्र गंतव्यमिति भावः। मुग्धायालक्षणं शृंगारतिलके मुग्धा नववधूस्तत्र नवयौवनभू
षिता। नवानंगरसस्यापि लज्जाप्राय रतिमतेति। किंचाकृतापराधे दयिते बाष्परुद्धा
वलोकना प्रियाप्रियेक्तौ चाशक्ता मानेन विमुखी सदा। किं च नयौवन लेनापि दृष्टचलकौं

Dr. Urmila Sharma Collection, Varanasi

सगर्वसरजोगंडस्समममुखारुणाधरं। लावण्योद्भेदरम्यांगं विलसद्भावसौरभं। उन्मीलितांकु
रकुचमस्फुटांगकसंधिकं। प्रथमे यौवने तत्र वर्तमानां मृगेक्षणां। अपेक्षते मृदुस्पर्श
स्मितेनोद्धतां रतिं। सखीकेलिरसास्वांगासंस्कारकलितादुरान कोपहर्षाभिजने स
पत्नीदर्शनादिषु नातिरज्यते कांतस्य संगमे किंनरूंधती नित्तलक्षणात्। अथवा। अत्रद
क्षिण्यरूपो नायकगुण उक्तः। उक्तं तत्रैव। यो गौरवभयं प्रेमसद्भावं चैं पूर्वयोषिति। नमुं
चत्यन्यचित्तोपि ज्ञेयो सो दक्षिणो यथेति। केचित्। नायका स्वपत्नेकासु तुल्यो दक्षिण
उच्यते इति। अत्र न घटते श्रीराधाया मनुरागाभिप्रायश्रवणान्यथा सर्वगोपीषु सैवे
काविभारसतवलुभेति। पक्षे। श्रीभागवते च। अनयाराधितो नूनं भगवान् हरिरीश्वरः।
यन्नो विहाय गोविंदः प्रीतो यामनयद्रह इति। वृषभानुरिति ख्यातो नंदगोपव्रजे वसन्।
तस्य कन्या वरारोहा राधा नाम्नीति च सा ता इति वाराहे। राधया माधवो देवो माधवेन
च राधिका। विभ्राजते जनेष्वधी इति ऋक्परिशिष्टे च। जनेषु सर्वगोपीजनेष्वित्यर्थः। तदेवं
संगतिः प्रथमेह्नि तया सह विलासं समाप्य द्वितीयेह्नि तत्संकेतिताभिसारे तस्याप्य सौभा
ग्यानि त्वाय पोषणाय विविधरसवैचित्रीसमुदायोदयाय निस्समेव श्रीमद्भगवतः सेवांगु
बाणस्य परिपूर्णशृंगाररसस्य योगात्। मीलिते नायकरागुणाकृष्टगोपीगणेन द्रुणाकृष्ट
चितोपि तद्योग्यचेष्टयात्तस्या संगमामृतं कासयमानो पिताभिः सह क्रीडां कृतवान् निति।
एतत्कथयपदं। अथ पदानि। कीदृशो हरिः। चंदनेन चर्चिते अनुलिप्ते नीलकलेवरे स्यामश
रीरे पीतवसनं पीतवस्त्रं वनमाला च यस्य तादृशाः। पुनः कीदृशो हरिः। केलिषु चलती कंपमाने
ये मणियुक्ते कुंडले ताभ्यां मंडितं अलंकृतं गंडयुगं कपोलयुगं यस्य स स्मितेन ईषद्धसितेन
चित्रालाश्रो भमानः। स्मितलक्षणं भरतेन। ईषद्विकसितैर्गंडैः कटाक्षैः सौष्ठवान्वितैः। अल
क्षितद्विजं धीरमुत्तमानां स्मितं भवेत्। तथा च श्वेतचंदनपीतांबर२० विविधपुष्पमालया स्मि
तेन च श्यामशरीरो विचित्रवेषेण तं [illegible] नायको भातीत्यलंकल्पितमिति भावः।१।७४

CC0. In Public Domain, Digitizagtion by eGangotri

मुग्धानांचेष्टितमाह। पीनेत्यादिना। काचिद्गोपवधूः पीनपयोधरभारभरेण मोसलमन
गौरवातिशयेन सरागं सानुरागं यथास्यादेवं परिरभ्यालिंग्य उदंचितः ऊर्ध्वमंचितः
पंचमाख्यो रागो यत्र एवं यथास्यात्तथा अनुगायति। अनुपश्चाद्धरेर्गानानंतरं गायति।
उदंचितपंचमस्वररागो यथास्यात्तथेति वा। तत्र पीनपयोधरेत्यादिना सौंदर्यं प्रतिपादि
तं। मुग्धं त्वं च तस्य परिरंभणोद्यमं विनैव प्रथमपरिरंभणात् अन्योन्यकृते परिरंभे हि
शृंगारः पुष्टो भवति। तदुक्तं दशरूपके। रम्यदेशकलाकालवेषभोगादिसेवनैः। प्रमोदात्मा
रतिः सैव यूनोरन्योन्यरक्तयोः। प्रहृष्यमाणः शृंगारो मधुरांगविचेष्टितैरिति। किंच। श्री
कृष्णस्यानुगानेन गीतत्रिस्थापिनेनि ध्वनितं समत्रिस्थयैव रसो समितः। तथा। काचि
त्समं मुकुंदेन स्वरजातिरभिन्नीना उन्नितेपूजिताते

पीनपयोधरभारभरेण हरिं परिरभ्य सरागं। गोपवधूरनुगायति काचिदुदंचितपंचमरागं।२
नत्रीयता साधु साध्विति। तदेव ध्रुवमुन्निनेतुं स्वमानं च बहुदातिदिंमागच्छतोक। अथवा।
सरागमित्यादि हरेर्विशेषणं। कीदृशं हरिं सरागं रागेण तच्च संभोगसवलित सिंदुरादिना
सह वर्तमानं स्वरागं संलग्नं सानुरागं सरागमिति वा। तत्र हेतुमाह। पुनः किंलक्षणां उदं
चितभाता रावधितु ध्वनीतं पंचमस्वरो येन तादृशां। तदुक्तं भरतेन। मध्यपंचमभयिष्ठः
स्य शृंगारयोर्भवेदिति। शृंगारपंचमस्वरो बाहुल्येन भवतीति तत्सदनुरागेण लदाका
न संकेतेनैगायतीति भावः। अथवा पंचमो उदंचितो रागो यत्र तादृशां। उक्तं च। निषादर्ष
भगांधारषड्जमध्यमधैवताः। पंचमश्चेत्यमी सप्ततंत्रीकंठोत्थिताः स्वराः। निषादं वृंह
ते वाजी गावः स्वर्षभभाषिणः। अजाविकं तु गांधारं धैवतं वृंहते गजः। षड्जं मयूरा ब्रुवते म
गीमध्यमभाषिणः। पुष्पसाधारणे काले कोकिलो रौति पंचमं। मिति च। कश्चित्। षड्ज
वदेन्मयूरोपि ऋषभं चातकोवदेत्। अजा वदति गांधारं क्रौंचो वदति मध्यमं। पुष्पसाधा

Dr. Urmila Sharma Collection, Varanasi

रणे काले कोकिलो रौति पंचमं। ददुरो दैवतंश्चैव निषादं च वदेद्गजः इति हलायुधः। हास्य शृंगारयोर्ज्ञेयौ स्वरौ पंचममध्यमौ। षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे। गांधारश्च निषादश्च कर्तव्यौ करुणा रसे। धैवतश्चैव कर्तव्यो बिभत्से च भयानके। भैरवपंचमौ मधमल्लारो गौडमालवो देशाख्यश्चेति षड्रागाः प्रोच्यन्ते लोकविश्रुताः। सप्तस्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः। तानास्त्वेकोनपंचाशद्देतद्गेयस्य लक्षणमिति। एवं तद्रागमोहिता या सा च संभोगचिह्निते नखसंकेतं गायता सहालिंगनेनानुगायनेन न तस्याः मोग्ध्यं स्फुटमेव कथितमिति भावः। तथा च स्त्रियो हि गीतेन मोहिता भवंति। तदुक्तं। गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप। स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं

कापि विलासविलोलविलोचनखेलनजनितमनोजं। ध्यायति
मुग्धवधूरधिकं मधुसूदनवदनसरोजं॥३॥ हरिरिह म०॥

ततः इति भागवतोक्तिश्चापकर्म्यातिश्च नूतद्गोहितो जन्मने देवाश्च श्रवणयुष्मदक्तेष्वास्मानुवर्तने विष्णुया महाइति ब्रह्मगंधर्वाभिवदध्यगायन्देवाः सादेवानुगायनठपावर्तनं तस्मात्स्वयंतं स्त्रीषु कामयंते कामुकाः। एवं स्त्रियो भवंतीति। श्रीराधायाः अपेतस्याः अगौरवसूचनाय कांचिद्दृष्टकं पंचमो रागभेदस्यास च नाम पि पूरणे। पंचमश्चतुरे हृद्ये पंचमः पातु वो स्त्रियामिति विश्वः॥२॥ कापि सादिः कापि मुग्धवधूर्मधुसूदनस्य वदनसरोजं मुखपद्मं अधिकं यथा स्यात्तथा ध्यायति चिंतयति। कीदृशं। विलासेन विलोलयोश्चंचलयोर्विलोचनयोः यत्खेलनं तेन जनित उत्पादितः मनोजः कामो येन अर्थात्तस्यामेव तं आधिकमित्यपि मुखस्य विशेषणं वा। तदा पुनः कीदृशं मुखपद्मं अतुल लोचन्यास्पदमित्यर्थः। सौगंध्यादिगुणाख्यापनाय मधुररसास्पदेनाधिकोमोदाधिकसायंकानापहारकत्वाच्च वदनस्य सरोजोपमा। मधुसूदनपदेन तस्यामनुरागस्य स्थि

रत्वं सूचितं तत्समक्षे सपत्न्या नारदेनोक्तं मधुसूदनस्य अधिकं

CC0. In Public Domain, Digitizagtion by eGangotri

क:पिकपोलतले सा दि।कापि नितंबवती दयितं कपोलतले चारु मनोहरं यथास्यात्तथा चुचुंब चुंबनं कृतवती किं लक्षणा। किमपि कार्यं लपितुं मंत्रयितुं श्रुतिमूले कर्णमूले मीलिता संलग्ना की दृशे पुलकैः रोमांचैः अनुकूले प्रियामिलासी सूचके। औत्सुक्येन सा कांतमुखचुंबनं सर्वजनहास्यकं रम्यतीति व्याजेन चातुर्यं प्रसार्य प्रसार्य तदारब्ध मिति भावः। अत्रापि स्वयमेव प्रथमं चुंबनेन तस्या अधीरत्वं ध्वनितं नितंबवतीस्व ननसौंदर्याधिक्यं च कथितं अथवा कापि नितंबवती सुंदरी परमविदग्धा तव स खी श्रुतिमूले लग्ना किमर्थं किमपि तव संगमवार्त्तां लपितुं कथनार्थमिसर्थः। तदा किं कृतवती तदाह दयितं पुलकैरनुकूले कपोलतले चारु चुचुंब॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले। चारु
चुचुंब नितंबवती दयितं पुलकैरनुकूले। केलिकलाकुतुकेन
च काचिदमुं यमुनाजलकूले। मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले
तव कथाश्रवणादि सात्त्विकविकारेण मय्यनुगतत्वं सूचके कपोलतले तथा चारु यथा स्यात्तथा चुचुंब अनुमोदनं कृतवती स्वयं स्वबः। यदा तव वार्त्ताश्रवणेनापि रता दृश्यो भवतितदा किं वक्तव्यं तव संगमानुरागः। ततः मेलनमेव कार्यं॥४॥ केलीसा दि। का चिगोपसुंदरी अमुं श्रीकृष्णं केलिकलाकुतुकेन दुकूले पट्टवस्त्रविषये विचकर्ष आकृ ष्टवती दुकूले गृहीत्वा अमुं विचकर्षेति केचि द्योजयंति। कीदृशं। मञ्जुलो मनोहरो वंजु लो वेतसो यत्र तादृशो यः कुञ्जः तत्र गतं तव सखी निरीक्षयंती सावधाना यस्मा त् कुत्रचित् कर्षी। यमुनाजलकूले यमुनायाः जलयुक्ते रोधसि तत्रागमना २१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वाय निलीयवंजुलकुंजस्थं श्रीकृष्णं यमुनाकूले प्रति श्रीउद्धवं आकृष्टवती सखी। अत्रा
प्यन्यानुरक्तस्य वक्त्राकर्णनाद् धीरत्वं गम्यं अथवा केलिकलाकुतुकेन तव विलासो
त्सुक्येन ता सां वचनं कृत्वा यमुनाजलकूले तटे यो वंजुलकुंजः बकुलकुंजः तत्र गते
अमुं काचित् करेण दुकूले विचकर्ष सख्येयः। कुतुकं चकुतूहलमित्यमरः। मनोज्ञं यं
जु मञ्जुलमिति च। वञ्जुलो बकुले स्याद्वंजुलो वेतसे मत इति धरणिः। दुकूलं क्षौमे
सूक्ष्मांशुके पि।।५।। करतले त्यादि। ननु गोपीभिः क्रीडां कुर्वतः श्रीकृष्णस्य कुत्र म
यनुरागः कथं वृथा प्रलपं करोषि तत्र आह। स्वयमेव शृणु। काचिद्युवतिः वरांगणी रा
धाभिधा ना हरिणा श्रीकृष्णेन प्रशंसिता कीदृशी। रासरसे रससमूहो रासः रास
श्चासौ रसश्च तस्मिन् वासे बहु नर्तकनर्तकीनां नृत्यविशेषो रासः गोलस्मिन्यो

करतलतालतरलवलयावलिकलितकलस्वनवंशे।
रासे नृत्यपरा हरिणा युवतिः प्रशशंसे।।

रसः संगीतकौशले न चमत्कारविशेषः। तत्रेति वा सह नृत्यपरा श्रीकृष्णेन सह
तुल्यं नृत्यन्ती कीदृशे रासरसे करतलयोस्तालेन परस्परं वादनेन तरलाश्चञ्चला
यावलयावलिः कंकणपंक्तिः तया कलितः मिश्रितः कलस्वनः अव्यक्तमधुरशब्द
स्तत्सहितो वंशो वेणुर्यत्र तादृशे अयमभिप्रायः। श्रीराधां विना ऽन्ययुवतिगणे श्री
रासके मतिः श्रीकृष्णपूर्वप्रवृत्तप्रस्तावेन श्रीराधिकास्तोत्रेणाखिलगोपीगणं नि
वर्तयतीति। अथवा रासरसे रासानुरागे सति सह नृत्यपरा युवतिः हरिणा प्रशशं
से कस्मिन् करतलतालतरलवलयावलिकलितकलस्वनवंशे संप्रति तत्कर
तालमिलितवेणुकलध्वनौ केनापि संकेतेन तत्वस्तत्रिंकरोस्तताभिर्नलक्ष्यते।

Dr. Urmila Sharma Collection, Varanasi

नस्तासां मोग्ध्यमिति भावः॥ द्रुमभेदकरास्फाले तालं तु हरितालकं इत्यमरः॥ तरल श्च
चले स्वर्द्धहारमध्यमणौ पीतं च वंशी वेणौ कुले वर्गेति स्वावधंदेन्धिचारासं रस सू
रासस्यादिति च॥ रासरस गोदुहस्त्री भेति हाराविलिः॥६॥ श्लिष्यत्यादि॥ काम पि रामां क्री
डाशीलां श्लिष्यति आलिंगति॥ कामपि चुंबति॥ कामपि मधुरं स्वनादिना रमयति
क्रीडयति सश्रीकृष्णः स्मितेन ईषद्धसितेन चारु यथा स्यात्तथा परां गोपी पश्यति॥ र
वं नास्य भिस्तासु दाक्षिण्ये नालिंगनादिकं पृष्ट्वा रोषेण गच्छंतीमपरां वामां चकस्व
भावां मनोहर स्वभावां वातवसखी अनुगच्छति॥ अनुनयार्थं अनुगतिं करोति॥ अथ
वा एवं सस्मितावलोकादिमात्रेण तासां वचने रुसां वामां सा अनुगच्छति अनुनयार्थमभि

श्लिष्यति कामपि चुंबति कामपि कामपि रमयति रामां पश्य
ति सस्मितचारुपरामपरामनुगच्छति वामां॥७॥ श्रीजयदेवभणितमि
दमद्भुतकेशवकेलिरहस्यं॥ वृंदावनविपिनललितं वितनोतु शुभानि
यशस्यं॥ ल॥ हरिरिह मुग्ध॰॥ विपिनविनोदकलावलितं-

अतएव वल्य्येवतस्यानुरागः॥ अतः संगमार्थं विलंबं मा कुरुष्वेति भावः॥ सुंदरी रमणी
रामेत्यमरः॥७॥ श्रीजयदेवकवेः इदं सर्वस्वरूपं गीतं शुभानि वितनोतु विस्तारयतु॥
कीदृशं॥ अद्भुतकेशवकेलिरहस्यं क्रीडाकौतुकं लक्ष्यं तादृशं श्री राधारतं श्री कृष्णस्या
प्यनेकविलासवतीनां अनुरंजनत्वादद्भुतत्वं केशवपदेन सौंदर्यं च कथितं॥ पुनः कीदृ
शं॥ यशस्यं यशप्रदं॥ वृंदावनविपिनललितमिति पाठेन वृंदावने ललितं गीतं शृंगारचे
ष्टितं वा वृंदावने अद्भुतकेलिरहस्यं वा॥८॥ अत्राभिसारिकैव नायिका॥ धृष्टदक्षिण
नुकूलशठाश्च नायकाः॥ तत्र कामपि रमयति रामां सरागमित्यनेन धृष्टः॥ तथा अश्लिष्य
कान्यतरुणीभोगलक्ष्मा पि निर्भयः मिथ्यावचनदक्षश्च धृष्टायं खलु कथ्यते॥ दक्षिणस्त्वके

प्रियंवक्तिपुरोन्यत्र विप्रियंकुरुते भृशं॥ निगूढमपराधंच शठोयं कथितो बुधैः॥ मंजु लकंजुलकुंजगत मिति रमयति रामांविलसनेनेति दक्षः॥ अपरां नामामनुगच्छती सैनुकूल श्च कथितः तल्लक्षणं वक्ष्यते ये श्रीराधायामनुकूलोयदातदा धीरोदात्तोनुकूलनोध्य मात्र संघटते न तथा कुवलयदृशः संकेतस्यादिविलकोद्दालेर्मनसिज कलानारीप्रसा वनाम मितन्वतां॥ नकिल घटते राधारंगमसंगविधायितान्नत विलसितेन्नेति श्रीलक्ष्य स्य छटप्य च दृषः॥ पश्चपिधीरललितानुकूलोयं नायकः तथा सर्वनायकगुणा श्रीराधा रसपोषणाय तत्तद्भावैः श्रीकृष्णः संभवति॥ ननु सकलकलाभिज्ञः श्रीकृष्ण कथं हवाप नभिज्ञाभिर्गोपिभिः सहकेलिंकृतवानित्यत आह॥ विश्वेषामिति॥ हे सखी राधे मुग्धोवसंते मुग्धो मनोहरो हरिः क्रीडति॥ किं कुर्वन् विश्वेषां गोपीजना [illegible] पां प्राणिनां वा अनुरं जनेन अनंदं जनयन् पुनः किं कुर्वन् इंदीवराणां॥

विश्वेषामनुरंजनेन जनयन्नानंदमिंदीवरश्रेणी [illegible] रूपुन

यन्नंगरंगोत्सवं॥ स्वच्छंदं व्रजसुंदरीभिरभितः [illegible] गितः शृं

गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति

श्यामकमलानां या श्रेणीपंक्तिस्तद्वत् श्यामलैर्नीलैः [illegible] गैरवयवैरनंगस्य काम स्य उत्सवं उपनयन् उपस्थापयन् स्वावयवानां [illegible] स्यापि सौगीकरणात्॥ सौ कुमार्यं च कोमलस्यापि स्पर्शसहनतोच्यते॥ तदुक्तं हृति [illegible] नेचप्यंगेरिति सौंदर्यं कीर्तितं तदुक्तं अंगप्रत्यंगकानांयः सन्निवेशो यथोचितं॥ सुश्लिष्ट [illegible] बंधस्यात् सौंदर्यमुदीयते॥ कीदृशो हरिः अभितः सर्वतः बाह्यैरवयवैरंतरमंतः सौभयत [illegible] प्रति स्वच्छं दं यथास्यात्तथा व्रजसुंदरीभिरालिंगितः कइव मूर्तिमान् शरीरी शृंगार इव [illegible] सइव॥ तथाच शृंगारसःसख्या मतोकृष्णस्यामं॥ तदुक्तं भरतेनोत्या मोभवास्यशृंगारेण हासः प्रकीर्तितः मध्या मुग्धो मनोहरः शृंगारो रसो मधौ वसंते क्रीडति सर्वत्र विलसति॥ किं कुर्वन् अनुरंजनेन यो परस्परं रागजननेन विश्वेषां प्राणिनामानंदं जनयन् पुनः किं कुर्वन् अंगः शृंगाररसस्यांगभूतः

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियंवक्ति पुरोन्यत्र विप्रियं कुरुते भृशं। निगूढमपराधं च शठोयं कथितो बुधैः मंजु
लकंजुलकुंजगत मितरमयति रामां नेसनेनेकः। अपरांवामामनुगच्छतीत्यनुकूल
श्चकथितः तल्लक्षणं वक्ष्यते ये। श्रीराधामामनुकूलोय दा तदा धीरोदात्तोनुकूलनोप्य
मात्रसंघटनो न यथा कुवलयदृशः संकेतस्थाद [illegible] कोत्रालेर्मनसिजकलानारीप्रला
वनामभितन्वतां। न किल घटते राधारंगमसंगविधायिनाव्रतविलसितैस्त्रैप्रिलम्
स्यच्छटप्यथद्विषः यच्छपि धीरललितानुकूलोयं नायकः तथा सर्वनायकगुणाः श्रीराधा
रसपोषणाय तत्तद्भावैः श्रीकृष्णः संभवति। ननु सकलकलाभिज्ञः श्रीकृष्ण कथं हवाय
नभिज्ञाभिर्गोपिभिः सह केलिं कृतवानित्यत आह। विश्वेषामिति। हे सखी राधे मृधौ वसंते
मुग्धो मनोहारो हरिः क्रीडति। किं कुर्वन् विश्वेषां गोपीजनानां [illegible] वांप्राणिनां वा अनुरं
जनेन अनंदं जनयन् पुनः किं कुर्वन् इंदीवराणां।

[illegible]
[illegible]
[illegible] इति

श्याम कमलानां या श्रेणीपंक्तिस्तद्वत् श्यामलैर्नीलैः सुकुमारैरंगैरवयवैरनंगस्य काम
स्य उत्सवं उपनयन् उपस्थापयन् स्वावयवानामुत्तरवयवैस्तस्यापि सांगीकरणात्। सौ
कुमार्यं च कोमलस्यापि स्पर्शसहनतोच्यते। तदुदाहृतिः प्राह्णैतेवपुर्गौरिति सौदर्यं कथितं
तदुक्तं जगत्त्रयं गकानां यः सन्निवेशोयथोचितः। सुश्लिष्टत्वं धियं यस्यात्तं सौदर्यमुदीयते
इति। कीदृशो हरिः अभितः सर्वतः बाह्येरवयवैरंतरात्मैनसा भयत प्रसं [illegible] प्रति स्वच्छं
दं यथा स्यादेवं व्रजसुंदरीभिरालिंगनेः कृत्वमूर्तिमान् शरीरी शृंगार इव शृंगाररस इव। तथा च
शृंगार स सख्यामहा कृष्ण स्यामं। तदुक्तं भरतेन। श्यामो भवति शृंगारः श्वेतो हास्यः प्रकीर्तित इति।
यथा मुग्धो मनोहरः शृंगारेरसो मूर्त्तोयसंतेक्रीडति सर्वत्र विलसति। किं कुर्वन् अनुरंजनेनय
नो परस्परं रागजननेन विश्वेषां प्राणिनामानंदं जनयन् पुनः किं कुर्वन् अंगैः शृंगाररसस्यांगभूतैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिभावैश्च अंगो स्वयंउपनयनं केवलमतिशायि रित्याह। इंदिवरेत्यादि। इंदीवरश्रेणीभिः नीलोत्प
लपंक्तिभिः श्यामलै गात्रे यथा कोर्नीलनिचोलतमालवद् नादिभिः कोमलैर्मृदुत्वाद्यादिभिः।
तत्रहेतुगर्भविशेषमाह। स्वच्छंदमित्यादि। स्वच्छंदं यथा स्यादेवं व्रजसुंदरीभिः अंगमंगं प्रति
आलिंगितः। आश्रीतः शृंगाररसस्याश्रितो विभावादीनामध्येकयाचित् तांबूलस्रक्चंदनाद्यु
दीपनविभावरूपं कयाचित् सस्मितकटाक्षाद्यनुभावरूपं। कयाचिच्छंकासूयादिसंचारिभाव
रूपं कयाचिच्च रोमांचस्वेदादिसात्विकभावरूपं शृंगाररसस्याश्रितं मिति भावः।
विभावादीनामंगत्वं प्रतिनु भरतः। विभावैरनुभावैश्च प्रायैः संचारिसात्विकैः। जनितो बोधितः।
स्फीतो वृद्धः शृंगार इत्यर्थ इति। विभावसामान्यलक्षणं तु रसरत्नदीपिकायां। भावयंति चित्र
त्वेण येरसान्वैमनोरमान्। ते विभावा समकथ्यंते नाट्यशास्त्रविशारदैः। तत्र शृंगारविभा
वा भरतेनोक्ताः। ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः उपवनगमनविहारैः शृं
गाररसः समुद्भवति। अनुभावसामान्यलक्षणं। क्रियंते येरसाः सम्यक् ज्ञोकानुभवगोचरं।
तेनुभावा समकथ्यंते नाट्यशास्त्रविशारदैः। तत्र शृंगारानुभावाः नयनवदनप्रसादैः स्मित
मधुरवचोधृतिप्रमोदैश्च। मधुरैश्चांगविकारैस्तस्याभिनयः प्रयोक्तव्यः। व्यभिचारिसामा
न्यलक्षणं दशरूपके। विशेषादाभिमुख्येन चरंतो व्यभिचारिणः। तत्र शृंगारव्यभिचारिणः।
शृंगारतिलके शंकासूया तथा ग्लानिर्व्याधिश्चिंता स्मृतिर्धृतिः। औत्सुक्यं विस्मयो हर्षो व्रीडो
उन्मादो भयं तथा ग्लानिर्व्याधिश्चिंता स्मृतिर्धृतिः औत्सुक्यं विस्मयाः हर्षव्रीडोन्मादो भ
यं तथा विषादजडतोनिद्रावहित्था चापलं मतिः। इति भावाः प्रयोक्तव्याः शृंगारव्यभिचा
रिणः इति। सात्विकभावाः शृंगारतिलके। स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः।
वैवर्ण्यमश्रुप्रलयइत्यष्टौ सात्विकाः स्मृता इति। एतेषामवांतरलक्षणानि ग्रंथगौर
वभयान्न लिख्यंते। अत्र सकलकलाभिज्ञस्यापि व्रजसुंदरीभिः सहतदुत्तेसा
रणा क्रीडनः श्रीकृष्णस्य न दक्षत्वहानिः। तासां तथैवानुरंजनात्। अत एव वि
श्वेषामनुरंजनेनेस्मनेन विश्वानुरंजकत्वं कृष्णस्योक्तं तेनैच तासु साधारण २५।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रेमकथनेनतस्यएवोत्कर्षःकथितइतिभावः।अथवाहेसखितवारंनुजनेनश्रीसुन्दरे
नविश्वेषांसर्वेषांसखीजनानांनःआनंदंजनयन्क्रीडयतीसुर्भ्यः।स्त्रीसंयोगेनास्मिन्न
सूयानकर्त्तव्योइतिभावः।नाभिःस्यातंत्मेनालिंगितेसानस्यनुतयालिंगनेप्रीतिरितिभा
वःअन्यसमानेशृंगारःसुस्वरेनाट्येरसेचजनमंडनेतिविश्वःविश्वंसर्वंमचक्राप्रीति
चइंदीवरंतुनीलेस्मिन्निस्मरः।कालश्यामलमेचकाइतिचमूर्तिःकाठिन्यकायपयोरिति
चपुंसःस्त्रियास्त्रियापुंसिसंभोगंप्रतियास्पृहासश्रृंगारइतिप्रोक्तोरतिक्रीडादिका
रणमिति।सथाचव्रजसुंदरीभिरभितःप्रसभमालिंगितइसनेनाभितःसर्वतःयदंगया
आलिंगितवतीतदंगमाधुर्यातिरेकात्।

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरंभ्यनि
र्भरमुरःप्रेमांधयाराधया।साधुत्वद्वदनंसुधामयमितिव्याहृत्य
गीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः।।५।।

सायुक्तेनसमभ्यभिभूतइतिभावः।उक्तंचसाक्षान्मन्मथमन्मथः।काचित्कुरांबुजन्योरेज
गहेन्नलिनामुदेसादि।स्वछंदमितिचयथेष्टविलासास्पदत्वंकथितं।।१२।।इदानींसर्गांतेक
विरोश्रीषंप्रयुंक्ते।रासोल्लासेतिहरिःश्रीकृष्णःवःयुष्मान्पातुरक्षतु।किंभूतोहरिःस्मितेन
मंदहसितेनैवान्यनारीणांमनोहर्तंशीलमस्यसतथा।पुनःकिंभूतः।राधयाउद्भटप्रकार
मेवयथास्यात्तथाचुंबितः।किंकृत्वाआभीरवामभ्रुवांगोपांगनानांअभ्यर्णेसमीपेउरोवक्षः
५१ निर्भरंगाढंयथाभवत्येवंपरिरभ्यालिंग्य।किंलक्षणानांगोपीनां।रासोल्लासभरेणरासक्रीडा
यांहर्षातिशयेनविभ्रमभृतांविलासवतीनां।विभ्रमभृतनपेत्रयतीतिननुभवतु
तासुविभ्रमःप्रसह्ययुवतिगणंपश्यंस्तानयाकथंचुंबितस्तत्राहप्रेमांधयाप्रेम्णाहर्षा
तिशयेनांधया।श्रीकृष्णंविनान्यंनपश्यती।तथालज्जाजनकस्यान्यस्यादर्शनादेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्भरं मालिंग्य चुंबनं कृतवती तिभावः। न त्रापि न केवलं प्राम्यतया एवं कृतवती किंतु स चातुर्यमिसत आह। त्वद्वदनं त्वन्मुखं सुधामयममृतमयं साधुक्तो मनमिति व्याहृत्य उक्त्वा। गीतस्तुति व्याजात् गानप्रश्नो सा छलेन यद्गीतं अमृतमयं त्वद्वदनं सुधानिधानमिति साधु युक्तमेवेति चातुरी नारच्य चुंबनं कृतवती तिभावः॥१३॥
इति चतुर्थः प्रबंधः॥ इति गीतगोविंदे सामोददामोदरो नाम प्रथमः सर्गः॥१॥
प्रथमे सर्गे अभिलाषचिंतारूपां दशां निरूप्येदानीं स्मरणरूपां दशां वर्णयति। तल्लक्षणं च स्मृति यो ततद्वचनैः सख्या प्रेरिता पि श्रीराधा समक्षं अन्या

प्रणये विहरति वने राधा साधारणप्रणये हरौ विगलित निजोत्कर्षा
दिर्ष्यावशेन गतान्यतः। क्वचिदपि लताकुंजे गुंजन्मधुव्रत
मंडलीमुखर शिखरे लीना दीनाप्युवाच रहः सखीं॥१४॥ इति प्रथमः सर्गः॥

भिः सहवर्तमानं श्रीकृष्णं द्रष्टुमसहमाना क्वचित्कुंजांतरे गत्वा सखीमाह। तदेव दर्शयति। विहरती सादिना। श्रीराधा सखीं रहो पि गोप्यमपि वक्ष्यमाणमुवाच उक्तवती। कीदृशी सा ईर्ष्यया च सेना सहिष्णुतया। अन्यतः अन्यत्र गता। ईर्ष्याया हेतुमाह। विगलितेत्यादि विगलित निजोत्कर्षाद्विगलितो गतो निजः स्वीयः उत्कर्षो रूमेवोत्तमा तिप्रणयिनी स्वयं रूपं तस्मात्। अन्यस्त्री भ्या निजातिरेकाप गम्यादिसर्पः कसति। हरौ कृष्णे विहरति सति कीदृशो हरौ। साधारणः राधायामन्य गोपीगनो समानः प्रणयेः प्रेमायस्य तादृशे।
ञु असाधारणप्रणयेति वार्जित प्रेमवती सर्था। अतो दीनाहुः खिता पुनः कीदृशी क्वचिदपि लताकुंजे लतागिर ति निबिडे कुंजे लीना। दृश्यैतये च स्थिता॥
कीदृशे कुंजे। गुंजंतः गुंजा समानाः ये मधुव्रता भ्रमराः तेषा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मंडलीपंक्तिरूपया मुरवरं वाचाले न्द्रीरवरं अगमागोयस्यतादृशे। तत्र कुंजे नैव छन्ना
च्छादितं गृह प्रासो लतापदं निभिडत्वं सूचनाय। अभिाभिन्नं नेति चिन्ह। इव्यामाहुसमा
नेषुदानमानाच मर्षणं। तथाच अमराणां मुाद्वेनोपिक मायो द्वेकः कथितइति सावः
इत्यं विशेनेनव्यभाचारि भायानापवेन्द्राः कथितः। ७। किमुवाचेसाह। सचरादिस्यादि
नाः। गीतस्यास्यागुर्जरी रागः। ताल संप्रतिमंठा रागलक्षणं प्राक्कथितं। ताललक्षणंतु
तारश्चाप्यपर श्चैवविचारः कुंद संज्ञितः। चत्वारः कथिताएते प्रतिमंठा विचक्षणैः। विरा
मांतं द्रुतं द्वंद्व गुरुश्चैकसः परं। तुरंगताले गातव्यः। तालेसु प्रतिमंठके। गुरुरेको भवे
चत्र सन्निपातः सकथ्यते। अपरः प्रतिमंठस्य निहृद्धिस्तेन गीयते। लघुद्वयं विरामांतु
तालकंदुकसंज्ञिके। विचारो गीयते तेन विलंबश्च लयो भवेत्

...मदुल हारसुनाम धुर... सुख... मा... नं... ना... नद गंचलचं
...ल ... के ना... चलो... वनसां॥ रासह... ॥ मह विहितं ... सारति मनं
द्रुतमेकं भवेद्यत्र सतालो खंड संज्ञितः। द्रुतलयेन गातव्यः कुंदश्च प्रतिमंठकः। तुरं
गः सन्निपातः कंदुकः। खंडइति प्रतिमंठश्चतुर्विधः। श्री राधोपाः सुतुरंगवर्णवर्णना।
तुरंगोयं प्रतिमंठकः। अपरे यमि प्रबन्धे वृत्तेयः। गीतार्थस्य हे सखि मम मनः हरि
चित्तवृत्तिचोरि श्रीकृष्णं स्मरति स्मृतिगोचरं करोति पूर्वानुभूत विषयत्वात् कीदृशं इह
वने रासक्रीडायां विहितविलासं विहितः कृतः मयासह विलसः क्रीडा येन तादृशं पु
नः कीदृशं कृतपरिहासं यथा नर्म केलिर्भवेत्तादृशं। अथवा। अन्यगोपांगनानां कृतपरि
हसं यथा स्यात्तथा मयासह विहितः। विविध विभ्रमो येन तादृशं। हरिं चित्तचोरं इहलता
कुंजे निलिनाय अपि मम मनः स्मरति। अथना विहितः कृतः मम विलासो विभ्रमो येन अति
...ह्यनुरागे वा मत्तः कारितइत्यर्थः। उक्तंच। अभीनस्यापि सेवायां कीतस्यानभिनंदनात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



Dr. Urmila Sharma Collection, Varanasi

मयासिकिंनकंबुरीबंधार्थमभ्यर्थितः।केनैनालमवहुवन्नचिकुरस्तोमोमदंदोपिमोव
कस्यापिनमार्जनंकुरुधनं घर्मांबुमेरीचितेनैवोत्तं सममालतीर्ममशिरः। खेदंमणेोरे
श्यतिादूनिरसाम्रतसिंधौ। स्त्रीणांविलासविद्योकविभ्रमाललितंतथा।हेलालीलेस
मीहावाःक्रियाःशृंगारभावजाःस्मरः।नथाचस्मरतीसनेनअष्टविधसंभोगेछेवध्य
न्यते।यतस्तस्याष्टविधस्मरणमेवसाधनंतथा। स्मरणंकीर्तनंकेलिप्रेक्षणं।गुह्यभा
षणं।संकल्पोध्यवसायश्चक्रियानिर्वृत्तिरेवच। एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः।
विपरितंब्रह्मचर्यमेतदेवाष्टलक्षणमिति। तत्रकेलिःमानसीक्रीडा।दिदृक्षयाप्रकर्षे
णेक्षणंप्रेक्षणंकथिमीलिष्यतीति विचारः।संकल्पःअध्यवसायःमिलननिश्चयः।
सुरतसुखप्राप्तिःक्रियानिर्वृत्तिःकेचित्तुरहरासेतिव्याकुर्वंतितन्नुनसमीचीनंअनु
पपत्तिप्रस्तावात्।दृहपदार्थस्यप्रसक्तेन्नाकल्पनातदुक्तंमहैः।द्दमप्रत्यक्षगतत्वमि
ति।तस्मान्नचात्ररासःप्रत्यक्षःतस्यातीतत्वात्। राधयाधस्ततीकुंजेनिलीनत्वात्।न
तद्विनारासस्यसंभवइति।एतच्चक्रवपदं।उत्तमामध्येयनायिकातल्लक्षणं। दोषानुस्व
सिकःपरजनेप्राणेषुाकोपोभनेकोपंसुखुपथ्यमेवदयितेदासोस्मिकृतेपरः।इत्युक्ता
नः।इतिशृंगारतिलकेयथावा।कर्तुंनार्मक्षणिकमपिसेसाध्यमुपत्यशेषंचितोसंगन
स्विलसुदत्यांराजतेसद्गुणेनेति।किंचसमानलज्जामदनाप्रेमतारूण्यशालिनी।किंचित्र
गर्भवचनामोहांनसुरतक्षमा।मध्यासाकोमलाकापिमानेकुत्रापिकर्कशी।अ जयपद
नि।कीदृशंहरिंसंचरतातानप्रतानक्रमेणस्फुरताअधरेणोष्ठेनसुधामधुरध्वनिमुख
रितोवादितोनादितोमोहनवंशापरममोहकारीवंणयेननादशा।अमयासंचेरसालकेममा

न्यकुंजमध्यकामदुरांगलितमनस्तरूपाभ्यासितामगुलितोमोहना

ख्यवेणुर्येनतादृशं॥ संचरदधरसुधयाविशेषणं। क्रियाव्यंग्यविशेषणानांक्लीबत्व मेकवचनांतत्वंचाव्यमितिा तदुक्तं रंभ्रान्वेणोरधरसुधयापूरयन्निति॥ कामगते कलपदा मृतवेणुगीतसंमोहितार्थचरितान्नचलेदिति। यथा वा॥ निसर्गतोविसस्थिनिस्यनवप्रियो सोगोप्यंतथापिहृदयंमदनोदुनोति। युक्ताकथंचनश्रामंगमितेचतस्मिन्मातस्यकालमुर लीकरोति। तदनुवरेणमोहितं ममनः सांप्रतंकृतापराधमपितंस्मरतीतिभावः। पुनः कीदृशं चलितः कनापिभावविशेषेण मसंभाननायघूर्णितोदृगंचलोऽपांगोपायत्रएवंय थास्यात्तथाचंचलौदोलायमानौमौलिः शिखरोयस्य। कपोलयो विलोलौचंचलौअवतंसौ कर्णाभरणेयस्यतादृशं॥ अनेनचित्रंकंपदोषंविनेयत्रौखरकुंडलचालनेनयादृकवैचि त्रीकथिता। तथाचाधरसुधोपादानेनतदाननस्यचंद्रादप्यानंदकरत्वं द्योतितं। पुंस्युत्तंसा वतंसौद्वौकर्णपूरश्चशेखरेइत्यमरः।

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं। प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥ रासेहरिमिह०॥

ननुव्यासंगादिनासविस्मार्यतामित्यतआह। चंद्रकेत्यादि। चंद्रकेणविचित्रवर्णचिह्नितेनअ ग्रभागेनचारूणांमनोहराणांमयूरशिखंडानांमयूरपिच्छानां मंडलेनसमूहेनवलयितःवे ष्टिताकेशायेनतादृशं। तथाचात्रमयूरादिदर्शनेनापितस्यैवस्मरणंभवतीतिध्वनितं। पुनः कीदृशं। प्रचुरैर्बहुलैः पुरंदरधनुर्भिः रनुरंजितः। चित्रितोयोमेदुरः सांद्रस्निग्धमुदिरोमघ तद्वच्छोभमानोवेशः आकृतिर्यस्यतादृशं॥ अत्रनानामणिखचितहारमुकुटकेयूरादीनांइं द्रधनुसाम्यंवेशस्यमेघसाम्यंचाभूतोपमा। प्रचुरपुरंदरधनुर्भिरनुरंजितस्यमेघस्याप्रसिद्धत्वा धवाकेशानांकृष्णस्यवामेघसाम्यं। शिखंडकानांधनुर्भिसाम्यंवनमालारूपायोवासिमौ चंद्रकमेचकाविसमरः। बर्हिकंठसमवर्णमेचकंत्र्यं तेशुधाःइतिकाष्णः॥ शिखंडस्तुपुच्छव र्हनपुंसकमिसमरः। वेष्टितंस्याद्वलयितमित्यपि। मुदिरः कामुकेब्दे इतिनिघंटः। मुदिरोजल दः। मकामुदिरोहर्षसंभितस्सनेकार्थः। वेशोवेश्यास्यागृहेप्राकोनेपथ्येगृहमात्रकेइत्यपि॥२॥ २८।

CC0. In Public Domain, Digitizagtion by eGangotri

गोपित्यादि। गोपकदंबकस्याभिरसमूहस्य या नितंबवत्यः प्रशस्तनितंबयुक्ताः स्त्रियः ता
सां मुखचुंबने लंभितः प्रापितो लोभो येन तं। अथवा गोपकदंबनितंबवतीनां मध्ये मम मु
खचुंबने लंभितः लोभो येन तां जबितेति पाठे लंबीकृतः चित्तारितस्त्वर्थः। गोपकदंबनित
ंबवतीभिः मुखचुंबने लंभितः प्रापितः लोभो यस्य तमिति वा। तस्य तु प्रणयो मय्येव तस्याभावि
कस्ताभिर्बलात्कारितइति भावः। पुनः कीदृशं। बंधुजीवपुष्पवत्। मधुरो मनोहरो ऽधरपल्ल
वः पल्लवाकृतिरधरो यस्य तं। अथवा बंधुजीवयुतीति बंधुजिवः प्रियजनस्य जीवनममृत
निधानत्वात् स चासौ मधुरो ऽधरपल्लवो यस्य तं। मधुरपदेन सरसता पल्लवपदेन सुकुमारता
रुणता च कथिता। उल्लसितेन विकसितेन स्मितेन शोभा यस्य तं। अनेन इंदीवरबंधुकोद्भव
स्तत्र कुंदोदय उपमीयते। तथा च बंधुकादिभिः स एव सायतइति भावः। रक्तक।

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं। बंधुजीवमधुराधरपल्लव
मुल्लसितस्मितशोभं॥ विपुलपुलकभुजपल्लववलयितबल्लवयुव
तिसहस्रं॥ करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रं॥४॥

रक्त बंधुको बंधुजीवकइत्यमरः। सरसो मधुरः प्रोक्तो मधुरो ऽथ मनोहरइत्यनेकार्थः॥ विपुलेति।
विपुलो विस्तीर्णः पुलको रोमांचो यत्र तादृशाभ्यां भुजपल्लवाभ्यां पल्लववत्कोमलाभ्यां बाहुभ्यां वलयि
तं वेष्टितं बल्लवयुवतीनामाभीरकांतानां सहस्रं येन तादृशं। अत्र वलयितमित्यनेनापि अवङ्
गावेष्टनमात्रं सरहस्यमालिंगनादिकं तस्य तु मय्येवेति ध्वनितं। पुनः कीदृशं। करयोश्चरण
योरुरसि च या निमणिमया निकटकादिभूषणानि अलंकरणानि तेषां किरणैः विभिन्नं
नाशितं तमिस्रं तमो येन तं। अंधकारः स्त्रियां ध्वांतं तमिस्रं तिमिरं तमइत्यमरः। अथवा। विपु
लः पुलको यासां ता स्ताभुजपल्लवेन वलयिता वेष्टिताश्च। एवंभूताया बल्लवयुवतयः ताभिः
सहसमकालमेकस्त्रवतीति सहस्रमिति। तथा च वात्स्यायनीयसूत्रे सहस्रवतीति सहस्र
मिति। एवंविधं कामुकीजनं स्मरतीति भावः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करचरणोरसि मणिगणभूषणकिरणैर्विभिन्नस्तं चित्रो विशेषणच्छिद्रो यस्य सोत्थितः। सपत्नीरूपान्तरायाणेनेता यस्मात् तद्भूषणे भूषितां मां दृष्ट्वा सपत्नी नोपरोधमयेति प्रचरिदित्यर्थः। उरसि मिति पाठांतरे। णत्व ह्रस्वः करणवाची। ततः तु स्वं प्रकाशमानमित्यर्थः। कोचिदेवं व्याकुर्वंति॥४॥ जलदपटलेति। पुनः कीदृशं जलदपटले सजलमेघसमूहे चलतः संभ्रममानस्येंदोः चंद्रस्य विनिंदकस्तत्शोभातिशायी चंदनतिलको ललाटे यस्य तं। क्वचिज्जलदपटलचलदिंदुविनिंदकचंदनबिंदुललाटमिति पाठः। तदा जलदपटले चलन्यदिंदुश्चंद्रः तस्य विशेषणं निंदकस्तिरस्कारश्चंदनबिंदुर्मदलाकृतितिलको ललाटे यस्य तं पुनः। कीदृशं। पीनो मांसलो कठोरौ ये पयोधरौ स्तनौ तयोः परिसरस्य पर्यं

जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटं॥
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं॥५॥

तभागस्य मर्दने निर्दयं हृदयकपाटं कपाटवद्विस्तीर्णं हृदयं यस्य सः तादृशं॥५॥ पुनः कीदृशं। मणिमये मणिप्रचुरे मकरवन्मनोहरे ये कुंडले ताभ्यां मंडितौ गंडौ यस्य तं। अथवा। मणिमय मकर मनोहरे कुंडले मंडिते याभ्यां तादृशौ कपोलौ यस्य तं। तदुक्तं। भूषणभूषणांगमिति। किंच। विभूषणं विभूष्यं स्याद्येनैतद्रूपमुच्यते इति रूपलावण्यमपि कथितं। मुक्ताफलेषु छायायास्तरलत्वमिवांतरा। प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यते। तथा यथा। शृणु सखि तव कर्णे या स्यात्र नीचैर्विरचय मुखचंद्रं माचथा। रा। द्विवर्णाद्यमुरसि मरारे रक्तिनान्या मृगाक्षी मरकतमुकुरामे बिंबिता सैव मेवेति रसा मृतसिंधो। अत एव खदरं सुंदरमपीत्यर्थः। तथा च। एतादृशं सुंदरवरं कथं न स्मरामीति भावः॥ ॥२९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदार्यविनियंग्राहःसर्वविस्थागतंबुधः।इतिविनयगुणत्वंवा।अथवा।मणिमयमकरम
नोहरकुंडलाभ्यांमंडितावलंकृतौममकपोलौयेनतं।अतएवउदारं।औदार्यगुणयुक्तं।रहसि
ममाभिलषितंसर्वतोक्षणमेवपूरितवानितिसकलमनंस्मर्यतइतिपुनःकीदृशं।पीतंवस
नंवस्त्रंयस्यतं।पुनःकीदृशं।औदार्योपपादकंविशेषणमाह।अनुगतसादि।अनुगता
आश्रिता।येमुनिवराःसुरवरास्तःतएवपरिवाराःपरिजनाःयस्यतं।अथवा।अनुगतानो
मुन्यासुरवरांतानांपरिवाराःप्रकर्षोयस्मात्तं।परिवादःपरिकरेपरिक्रेन्नाप्रकर्षयोरि
तिविश्वः।द्वंद्वांतेचरमएदस्यमन्यादिपदैःप्रत्येकमभिसंबधः।तथाच।नैरप्यधिगतस
स्वाभिमतफलैःसततंसेव्यतइति।तस्योदार्यंख्यातमेवेतिभावः।

मणिमयमकरमनोहरकुंडलमंडितगंडयुगलं।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं॥६॥

अत्रमुनिवराःशुकनारदादयः।मनुजवराःपरिक्षिदादयः।सुरवराःब्रह्मरुद्रादयः॥
असुरवराःप्रह्लादादयः।अथवा।अनुगता।येमुनिमनुजसुरासुरास्तेभ्योपिवरःश्रेष्ठः॥
गोपलक्षणोगोपीलक्षणोवापरिवारायस्यतं।अथवा।अनुगतःअनुसृतःमाधुर्यभरेण
आकर्षणात्मन्यादीनांवरपरिवारःश्रेष्ठःपरिग्रहोयस्यतमिति।उक्तंचआरूधानमरुंध
तीहृदयमप्यार्द्रस्मितार्द्रश्रियति।कास्त्रीतदुरवापेतिच।मय्यनुगतोमुन्यादीनांपरिग्रहो
यस्मात्तमितिवा।दानंपप्युपपत्तिश्चधौतेचप्रियभाषणं।स्वजनेप्रियरयापितदौदार्य
मितिस्मृतमिति।नायकौदार्यगुणलक्षणं॥६॥विशदेति।पुनःकीदृशं।विषदस्य

Dr. Urmila Sharma Collection, Varanasi

निर्जलस्यकदंबस्यतले मूले मिलित सलग्नं मत्संकेति कृतं कदंबतले मद्पेक्ष
माण्मलदवगलाकाचिन्मामपश्यत्तुइति मया सहन मर्थिवानिलीयस्थितं पुनः
कीदृशं कलिः प्रणयकलहस्तस्मा यत्कलुषंचित्ते कश्मलं अहं संकेते समागतात्र
यं मागतः प्रायशो न्यनारीसक्तोभवतीति अतः परं यद्यायास्यति तदामयान
तंभाषणीयइत्येवंरूपं एकाकिनी कथमत्रतिष्ठामीतिचभयं अथवाभिमानाद्व
यं एतद्द्वयं कदंबमूलादुपेत्यस्वादूक्तिभिः शमयतं पुनः कीदृशं किमप्यनिर्वचनी
यं यथास्यात्तथातरंगानृतरंगइवा चरन्वारंवार मुहुश्छन्नंगः कामो यत्रतादृक्
नयादृशयादृश्यामेन सा च मामपि॥

निभृतकदंबतले मिलितं कलिकलुषभयं शमयंतं मामपि कि
मपितरंगदनंगदृशा मनसा रमयंतं॥७॥श्री जयदेवभणितमति
सुंदरमोहनमधुरिपुरूपं॥ हरिचरणस्मरणं प्रतिसंप्रति पुण्यवतामनुरूपं

रमयंतिमित्यर्थः मामपीत्यपिशब्देन सोत्कंठयो नेयाजहमपि तस्यकस्यचिल्लोकोत्तरप्रमाण
यस्य पात्रेमासमिति ध्वनितं एवं भूतं तं श्रीकृष्णं मे मनः स्मरतीति भावः कलिः स्यात्क
लहशूरं कलिरंसयुगेष्वपीतिविश्वः कलुषं वा पिनसोरितिचा॥७॥श्रीदेवेत्यादि श्रीजय
देवकवेरिदं भणितं श्रीकृष्णचरणस्मरणं जनकपुण्यविशिष्टानां हरिचरणस्मरणं प्रति श्री
राधाकथितसरासक्रीडावाचरणं तस्य स्मरणं प्रति संप्रति इदानीमपि अनुरूपं योग्यं ताद
शभाव विशेषणस्वादनीयमितिभावः कीदृशं जति सुंदरं मोहनं गोपवधूमोहनकारि म
रिपोः श्रीकृष्णस्य रूपं वर्णनीयत्वेन यत्र तादृशं॥ इति पंचमप्रबंधः॥५॥ ननु श्रीकृष्णः
सोचिनाऽन्यगोपीभिसह विहरति इत्किमिति स्मरसिसाहागणयतीत्यादि न म मनः ७॥

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णे पुनरपि कामं अभिलाषं करोति तत् किं करोमि कीदृशो कृष्णः। युवतिषु वल्लीषु
गोपवधूषु चलती वर्धमानातृष्णा यस्य तादृशो। अतएव मां विना विहारिणि वारंवारं विह
रणशीलरूपे। कीदृशं मनः। यान प्रतिकूलं या मत्येहस्तरम प्राह। गणयती सादी। तस्या
सौदर्यादीनां ग्रामं समूहं गणयति परिसंख्याति। अत्र मंत्रो यं प्रमादपि नेहते नेहते ने
च्छति। दोषं मद्विधप्रणयिन्य वधीरणादिकं दूरतो विमुतिचा। तत्र हेतुमाह परितोषसंतो
षं वहति। तत्र विभावना विशेषोक्ती अलंकारौ। निजानुसरणरूपानुरागहेतुं विनाप्यनुरा
ग प्रकाशनात् अन्यांगनासक्तिरूपवैराग्याकथनाच्च। तथाच काव्यप्रकाशे रव्येप्रकारिका
क्रियायाः प्रतिषेधेपि फलव्यक्ति र्विभावना। विशेषोक्तिरखंडेषु कारणेषु फलावचः।।१।।

ति [illegible]

[illegible]

एषा च काव्यप्रकाशकृत व्याख्याता हेतुरूपक्रियाप्रतिषेधे विफलप्रकाशनं विभावना। मिलिते
ष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति। ग्रामः स्वरे संवसथे वृंदे शब्दादिपूर्वके ति विश्वः।
ग्रामः क्रोधरवो दीप्ता चितिश्चा नामं सख्ये प्रतिपेचेति। कामः स्मरेभिलाषेच्चे स्मरः।।१५।।अथो
त्कंठिता नायिका रसमयी श्रीराधा सखी स्वमनोरथानाह। निभृतरतिश्चेयं पदं। गीतस्या
स्य मालवगौड रागः। एकताली तालः। रागलक्षणं कथितं प्राक्। काललक्षणं। एकताली त्रिधा
यं खंड संज्ञितः। शमाते मेकता लीतु कीर्त्यते गायकोत्तमैः। गुरुद्वयं भवेयत्र ताले
ह्रकाश्च द्रिकाख्येकताली स्यात्तेन सौभाग्यदायिनी।। कोकिलप्रियताले वै द्रुतत्रय मुदा
हृतं। विपुलाख्येकथा ली स्यात्तेन गीतज्ञ संमता खंडललित कोकिलप्रिया इति भेदास्त
त्रेतेयोः उत्कंठाया लक्षणं। उदाममन्मथमहा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्वरवेपमानो रोमांच कंठ किसमंगकमुद्वहंती। संवेदवेपथुचनोत्कलिकाकुलांगीमुकं ठितांवदति तां मरतः कवीद्र इति। गीतार्थस्त्वाहे सखि मयासह केलिमथनेश्रीकृष्णंरमय क्रीडय। कीदृत्र्या मया। मदनं ये मनोरथाः इच्छातच्चुको भावो रताख्यः सजातोयस्यास्ता दृशाया। अथवा। मदनमनोरथेन भावितया प्राप्तया। ननु कोवेद मयाप्राथनिकृतेक दाचिन्नायाति इत्यतआह। उदारओदार्यगुणयुक्तं। त्वत्प्रार्थितमवश्यंदास्यतेचेति भाव। अथवा। श्रीकृष्णः तल्लोभकत्वात्तस्ययो मनोरथः संभोगेच्छा तत्र येच भावितया। ननुकथं तस्येच्छाज्ञातेसत्यत आह। सविकारमिति। विकारो मानसो भावस्तत्सहितं। एवं मन्योन्यांउ रागपूर्वकत्वेन शृंगाररसपोषणमुक्तं तथाह। अनुरागो नुरक्तायोरेसो वहइति।

निभृतनिकुंजगृहंगतया निशिरहसिनिलीय वसंतं। चकितविलोकितसकलदिशारतिरभसरसेनहसंतं॥१॥ सखिहे केशिमथनमुदारं॥ तरमयमयासहमदनमनोरथभावितया सविकारं॥ ध्रु॥ ॥ ॥

स्थितिः। अभावेत्त्वनुरागस्त्वरसाभासंजगुर्बुधा इति। तथा चात्र महाभावमयीउत्तमा नायिका ज्ञेया। नायकश्चोत्तमस्तद्गुणा निरूपिताः प्राक्। सविकारमिति क्रियाविशेषणं वा दीतेविकारस्तनप्रांतादि प्रकटनेन तत्सहितं यथास्यादेवं मदनमनोरथभावितयेत्यन्वयः। तदुक्तं रसिकसर्वस्वे। नाभिमूलकुचोदरप्रकटनव्याजेनतस्य योषितां साकांक्षंमुहुरीक्षणं स्खलितता नीवीनितंबस्पृशः केशापत्रंशनसंयमोत्सुकमितुमित्रादिसंदर्शने सौभाग्यादिगुणप्रकाशनास्तिकथनेस्तासांतु रागेंगितमिति। तत्रसामर्थ्यापनायकेशिमथनपदोपादानं तद्वयोजनं च निःशंककेलिप्रतिपादानं। अथवा। प्रशस्ता। केशायस्याः केशी तं मथ्नातीतिकेशिमथनस्तं। स्वसौदर्येणाशेषसुंदरीणां क्षोभसगमित्यर्थः। केशी प्रशस्तकेशायानां केशीनां सो मथनश्चकेशिमथनश्च केशिमदनइतिचा स्वसौंदर्येणाविस॥

ऽ नितम्बाम्रकरध्वः उतांम्बा वीक्ष्यालभ्यतसुखामिस्र॥ ध्याऊष्यवांकका।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मीन्नित्तुन्नीलमस्येतिकेश्रीमुप्पजातोणिनिस्ताणीलो।अजासर्ग्रंमुपिधातोणिनिस्यात्नाछी
ल्पइतिमंथविलोउने।नंदिग्रहिपचादिभ्यइतिल्युः इति।मथ्नातीतिमथनः केशीचासौ
मथनश्चेति।कामस्यापिकामंममानसक्षोभकंचसर्थउक्तंचसाक्षान्मन्मथमन्मथः।
अथवा।केशिनंकामनियन्तारंयोगिवर्यमपिसमाधुर्येणक्षोभयतीतितथाभूतंकेशि
मथनंकिंपुनःरागिणामितिभावः।मूर्धिन्चितेजलेमूलेकायसुखेश्रमणिमारुतेकामेकाले
सुवर्णेकःशब्दइत्यनेकार्थः।भावितेसप्रथमव्याख्यानेतारकादिल्वादितचद्वितीयपक्षेभावि
तेवासिनेणासइतिविग्रहः।एकपदं।अथपदानि।पुनःकीदृश्यामया।निभृतमेकान्तंयथा
कुंजरूपंगृहंतवगतया।कीदृशंश्रीकृष्णंनिभृतरात्रावेकान्तेनिलीयतिरोहितीभूयवसंतं
एवंभूतंमांश्रीराधामापश्यतितिकौतुकेनमयापरिहसितुंसंकुचितमात्मानंस्थावस्थितमि
तिभावः।अन्याकाचिन्मापश्यतितिवा।पुनःकीदृश्याचकितंयथास्यादेवंविलोकिताःसकला
दिशोयया।तादृश्या।कुत्रकृष्णोनिलीयतिष्ठतीतिकलाभिसरंतीमांमाकश्चनपश्यतितिचकि
तेपश्यंसवेतिभयः।दृश्यंचविभ्रातादृष्टिःनदुक्तंगीतरत्नाकरे।यातुकश्चिदविश्रांतमविश्रहंवि
लोकनेविलर्णचंचलासुप्रतारासादृष्टिरुच्यते।विभ्रांताविभ्रमेवेगेसंभ्रमेचभवेदसौ।इति
च।कीदृशंश्रीकृष्णंरसानुरागेनबारंकौसंसोगेयोरभसःउत्साहस्तद्युक्तौयोरसःशृंगारस्थ
तेनहसतं।रसनुभावेहासः।तथाक्रीडायांकालपेक्षासहिष्णुतयासंप्रकटार्थंपुरःस्थितम
पिमामियंनपश्यतीतिकस्याहसंतमितिभावः।निभृतंरहएकांतमितिधरणिः।रससेवेग
उत्साहइस्मरः।भाप्रथमसमागमेति।पुनःकीदृश्या।प्रथमसमागमेनलज्जितया।श्रीडि
तया।निसोपघुकचरेपिहरौकेनापिरसविशेषमाधुर्येणानिमित्तनूतनया।प्रथमसमाग
मेस्फुक्तं।तथाचश्रीभागवते।यच्चश्यसौपार्श्वगतोरहोगतस्तथापितस्यांघ्रियुगंनवंनव
पदेपदेकाविरसेततत्पदाच्चलापियंश्रीर्नजहातिकर्हिचिदिति।प्रथमसमागमेकामिन्यो
लज्जंतिवामतामावहंतिचाययाहभरतः।श्लिष्यकंठेकिमितिनमयामूढयाप्राणनाथ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चुबस्यस्मिन्वदनविकृतिः किं कृता वा न दृष्टः। नोक्तं कस्मादिति नववधूश्लेषितं चिंतयं
ती पश्चात्तापं वहति तरुणी प्रेमनिजांतरस्था इति। प्रथमसमागमवल्लज्जितयेति वा
योजयंति। कीदृशं श्रीकृष्णं पटुनायिकाप्रसादनक्षमं यत् चाटुशतं प्रियवचनश
शतं तेनानुकूलं। विनयोक्तिशतैर्नुरेनयपरमित्यर्थः नक्षणमधुनेत्यादिना प्रक
टयिष्यति। तथा शृंगारशास्त्रे च। प्रथममिह हि एवं पुष्पगाधादिकं स्यान्मृदुमधु
रवचो प्रियेऽजिये सन्निधाने। करतलमथ गात्रे प्रामयंश्च यदस्या स्फुरितमुदरपु
ष्टेदमाश्लिष्यदद्यादिति। एवं वावैलक्ष्यापनोदनचातुर्यात् तदुक्तं। मुग्धा मनुनय
सेष मृदुपायेन सक्त्वस्तीरौदियन्। नातिप्रीतिकरैर्भावैर्निर्बंधैर्वलिभिषकैः। तथ
था सरतिसरसस्तीरादेषा क्रमद्धमरावलीसुमुखि पद्ममन्ये त्वयास्या पिपासया
इति निगदिते किंचिद्व्रीसा विवक्रितकंधरा वदनकमले बाला भर्त्रा चिरं परिचुंबि
तेति। शृंगारतिलके। पुनः कीदृश्या मृदुकोमलं मधुरं माधुर्यगुणसंयुक्तं मृदुलं
मधुरं रसयादिति वा स्मितयुक्तं भाषितं यस्यास्तया। तदीयचाटुकितिरपहृतलज्जा
याः किंचित्स्मितं च भाषितं च यस्याः तयेत्यर्थः। उक्तं च। कत्तरसचित्रोषेणेत्वं पि
लाषं नयेत्स्मृतिं यत्नापिका मुखगतं। मार्दवं तदुदीरितं। माधुर्यं च भवेयत्र शाकेथं
च स्फुटोसे रेइति। कीदृशं श्रीकृष्णं शिथिलीकृतस्मितादिनानुकूले मां ज्ञात्वा श्लथी
कृतं जघनस्थितं दुकूलं पट्टवस्त्रं येन तादृशं। अखिलनायकशिरोमणे श्रीकृष्ण
स्य दर्शने न दृढबंधापिनी विस्वयमेव स्खलिष्यतीति तन्मे रवलावलंबितं जघ
न स्थितमेव वासस्तेनापहरणीयमिति जघनदुकूलस्यापातं॥ तदुक्तं॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिहस्य। ओष्ठायं स्फुरती क्षणे विचलतः कूपोदरमस्तयद्रुस्मितः सुंकुमाकूलो
विगलितिमा नोति बंधपुनः प्रर्छन्नो भ्रजत्तैते नो प्रकटतां श्रोणितटं दृश्यते
नीवीच स्खलति स्थितापि सुदृढं कामो गितेयो षितामिति। यथाचा। कांते तल्प
मुपागते विगलिता नीवि स्वयं बंधनाद्वासो विश्लथमेखलागुणधृतं किंचि
न्नितंबो स्थितं। एतावत्सखि वेद्मि केवलमहं तस्यांगे पुनः को सौ कास्मि रतं च
कीदृशमिति स्वल्पापि मे न स्मृतिरिति भरतः। रते पूर्वावस्थेयं सूचिता। नृ
त्यत्तटं स्फुरद्वक्षोचिकसन्मुकपंकजा। ग्रियनं नीवीनाक्षिन्नो लिल्यमेव चेति।
चाटुनरीप्रियोक्तिः स्यादिति रत्नमाला। जघने कटेरथो मागेति हारावली॥२॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं॥
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं॥२॥

किसलये ति। पुनः कीदृश्या मया किसलयशयने पल्लवशय्यायां निवेशितया।
कीदृशं तं कृष्णं चिरं चिरं बहुकालं व्याप्य ममैव वक्षसि उरसि शयानं सुप्तं। एतेना लिं
गनविशेष उक्तः। तदुक्तं पंचसायके। गौरोपरिष्टादथ तल्पमध्ये संलीयते यत्नि
धुनं शरीरे कामाभिमाना क्षतपूर्णचेष्टं तत्क्षीरनीरादव्यमिदं प्रदिष्टमिति। पुनः
कीदृश्या कृतपरिरंभणचुंबनया याता दृश्या एतज्जघनोपश्लेषरूपालिंगनाभि
प्रायेण। तदुक्तं जघनकलितकांतश्रोणिरंगोपरिष्टाद्व्रजति यदिह नारी स्रस्तकेशा
नरीया। करजरदनकस्तचुंबनं वा विधित्सु कलयति जघनोपश्लेषमेनं कवींद्रा इति।
चुंबनमपि पंचसायके यथा। ओष्ठेन कांतस्य मुखे षु युगं निःपीडयति हा चित्तनालु
भागात् चुंबास्ययेन स्पृशति यत्र नारी प्रोक्तं समोष्ठमिति निपुटाधरिति। कीदृशं कृष्णं। प

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिरंभ्यालिंगनत्तं मदीयापानं येन तं। अनेन लालरिकमालिंगनमुक्तं। तदुक्तं पंचसायके
अन्योन्यसंरक्तमुखं कपोले नेत्रं ललाटं हृदयं च बाहुं। सानंदमार्वीभ्रममीली ताक्षं ला
लाटिकं तद्बुविदो वदंति। यथावा संकेतनल्पे युसुखोपविष्टा गाढं मतिश्लिष्यति सा
पिकांतं। अन्योन्यगात्रे विन्नातीव रागाद्दृढं तदाश्क्तत लज्जा मिधानमिति। पल्लवो स्त्री
किसलयमित्यमरः॥ ३॥ अलस्येति पुनः कीदृश्या मया। अलसेन मंथरे च ते निमी
लिते च ते तादृशे विलोचने यस्यास्तया। एतेनांगिकः कामविकारः कथितः। यत्र मूर्धा
नं मारस्य पादपर्यंतिकः। क्रिया अंगे विहिता यस्मात्तस्मादांगिकउच्यत इति॥
नायिकालक्षणे तदंगसंगमरसानंदे मुकुलादृष्टिश्च कथिता। तदुक्तं संगीतरत्नाकरे।

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं। कृतपरि
रंभणचुंबनया परिरभ्य कृताधरपानं॥ ३॥ अलसनिमीलितलोचन
या पुलकावलिललितकपोलं॥ श्रमजलसिक्तकलेवरया परमदनमदादतिलोलं॥ ४॥

स्फुरसंश्लिष्टपक्ष्माग्रा सुखविश्रांततारका। मकुलादृष्टिरानंदे हृष्टयोस्पृत्रिगयोरिति।
अथवा। अलसे आलस्ययुक्ते अत एव निमिलिते मुद्रिते लोचने यया। अत्र निमिलिते
मुद्रिते साच्छुपादानात्। अवघ्रस्तुंबनं मुक्तं। तदुक्तं पंचसायके। हस्तेन नेत्रपरि
मीलमर्तुः संमीलता सीवदने स्वजिंको। निक्षिप्य च क्रीडति यत्र लोका ग्यातं रसज्ञै
रवघ्रस्तमिति। कीदृशं श्रीकृष्णं पुलकावल्या रोमांचपंक्त्या ललितो मनोहरो क
पालो यस्य तं। अनेन सात्त्विकविकारः कथितः। तदुक्तं भरतेन स्मरणे संगमे चैव प्रि
यस्यालोकनेन तथा। हेस्तुत्रयं समासाश्च सात्त्विकः संभवतीति। स्तंभः स्वेदो सादिपूर्वमुक्तः। पुनः
कीदृश्या श्रमजलेन सुरतायासजनितश्रमवारिस्वेदेन सकलं सन्नोभं वा संपूर्णवा कलेवरमंगं यस्या
स्तया श्रमजलसकलकलेवरेति पाठे श्रमजलस्य कला निस्वेदबिंदवः कलेवरे यस्यास्तया। क्वचिच्छ्रम
जलसिक्तकलेवरयेति पाठः। कीदृशं श्रीकृष्णं परमत्कृष्टो यो मदनस्तन्मदो हर्षस्तेनातिशयेन लोलं। रः प्रचु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तानमप्रतिलः लभितिया। प्रचुरश्रेष्ठयोर्विरहति विभिः। अमजलेसादिना निराकुलप्रग
ल्भेयं नायिका चोक्ता। यथा। धन्यास्ता सखियोषितः प्रियतमे सर्वांगलग्नेपि या। प्राग
ल्भं प्रसयति मोहनविधान्याले व्यधैर्यं महत्तु अस्माकं तु तदीयपाणिकमले प्युनो चयस
मुकं कोयं काचयमत्र किंच सुरतं नेव स्मृतिजायते॥५॥ पुनः कीरश्यामया। कोकिलस्यक
लोव्यक्तमधुरो मोरवः शब्दतद्कूजितं शाब्दितयस्या रतया। अथवा। कलदनः पारावतपर्या
यः तद्वाको किलकलरवयोः कूजितमिनकूजितं यस्यास्तया। अनेन कूजिताख्यं वा स्वरनमुक्तं।
तदुक्तं पंचसायके पिकशिखिकलहंसप्रायपक्षिव्रजानां स्वनितमनुकरोति स्वांगनामन्मथार्ता
मुखदशनविवर्तितल्कवीद्रावदं तिस्तनितं मितिसमासाश्चित्रसंभोगकाले। यथा नारसिकसर्व
स्वादासूहलो वकमयूरकपोतहंसपारावतादिविरुतध्वनितं रताख्यं। तन्मिश्रनिःस्वनितसीत्क
तहासनादैः सयोजयेद्दशनचुंबनमैथुनादौ। तथा चोक्तं कांते तथा कथमपि प्रथितं मृगाक्ष्या चातु
र्यमुद्धतमनोभववारतेषु। तत्कूजितं मृदुवदद्भिरनेकवारं शिक्षापिते गृहकपोतशतैर्यथा स्यात्।
ननुवात्स्यायनादिशास्त्रे नखक्षतमुक्तं। तदुक्तं। आश्लेषं प्रथमं कुर्याद्द्वितीयं चुंबनं तथा। तृतीयं
नखदानं च दशाघातं चतुर्थकं पंचसंक्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमं केशाक्रान्तमष्टं धनं
चाष्टमं रतमित्सञकंठत्वाद्धस्यसप्तमरतस्यापेक्ष्यमाणनखदानादिना श्रीकृष्णस्य रसिकता
भंगः स्यादित्यत आह। जितेत्यादिना। कीदृक् श्रीकृष्णः जितो वशीकृतः कामत्रा सख्यविचारनी
णता। तद्यथा। चतुर्दशा विभामार्या स्वीया सेव्या परा न तु। परकीयामपि मजन्नुत मामेव काम
येत्। पुरा पि बाला मध्या च प्रौढा च स्त्री चतुर्विधा। बाला बलकरी स्निग्धा। मध्या श्लिष्टरतिप्रदा।
प्रौढबलक्षयकरी वृद्धा पुंस्त्वविनाशिनी। षोडशाब्दा भवेद्बाला त्रिंशताद्युतयौवना। पंच
पंचाशता प्रौढा वृद्धा स्त्री तदनंतरं। एवं चतुर्दशविधानां देवादिसत्वानां मध्ये गांधर्व
सत्वां मध्यां रममाणस्तु जितकामत्वात्राविचार इति। उक्तं। गांधर्वसत्वायाल क्षणं।
उद्यानकानन रता गीतवाद्यरतातथा। रतिमना चे सुस्नाता गांधर्वी सा प्रकीर्तिता। तस्य
वनं यथा। स्नाता सुगंधद्रव्येषु संगीतध्वनिपूर्वकं। महालिंगनदानेन गांधर्वी कामये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुषः इति। अथवा। जित मनसिजं तत्र विचारं बंधादि कौशलं। अनंदावांसैः स्थितिरिति वा। अथवा। जितो वशीकृतो मनसिजं तत्राणं कामपरायणा नामन्यचिलासिनां विचारः सिद्धांतो येन तदुक्तं साक्षान्मन्मथमन्मथः। कामिनां दर्पयिन्देन्यमिति। जितो निभूतः निरस्तः इतः मनसिजं तस्य विचारो येन तमिति वा। अयं भावः चतुषष्ठिकला कुशलस्यापि परमरसिकनायकस्य श्रीपुरुषोत्तमस्य स्वानुकूलेन मनायिकासंनिधौ रसमग्नतया क्रमस्मरणाभावान्न दोषः न च रसहानिः। तदुक्तं रतिचक्रप्रवृत्तस्य नैव शास्त्रं न च क्रमः। इति। पुनः कीदृश्या मय श्लथाः केशग्रहण चुंबनादिदानेन शिथिलाः कुसुमैराकुला व्याप्ताश्च कुंतलाः केशाः कलापाः यस्यास्तया। अथवा श्लथकुसुमैः आकुलाः कुंतलाः

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं श्लथकु
सुमाकुलकुंतलया नखलिखितघनस्तनभारं॥ध्रु॰॥ चरणरणितमणि
नूपुरया परिपूरितसुरवितानं। मुखरविसंखलमेखलयासकचग्रहचुंबनदानं॥७॥

यस्यास्तया। कीदृशं कृष्णं नखैर्लिखितो कितो घनः निबिडः स्तनभारो येन तं। तत्र लिखितपदोपादानात् पंकजपत्राख्यं नखदानमुक्तं। तदुक्तं पंचसायके। अस्पष्टमेव सुरितो र्ध्वरिखं प्राहुः क्षतं पंकजपत्रसंज्ञं। दोर्मूलवक्षस्तननाभिसंधावस्योपयोगं प्रवदंति महेशाः इति। तत्र प्रधानशास्त्रयोरिति विग्रहः। चुंबकः कुंतलो वा नरक्षच केशाः शिरोरुहः समराः॥७॥ एतावत्पर्यंतं पंचपद्यालिंगनादिसेविधं बाह्यरतमुक्तं। संप्रति बंधाख्यमष्टमं रतमाह। चरणेत्यादि। पुनः कीदृश्या मया। चरणयोः रणितौ शब्दायमानौ मणिखचितौ नूपुरौ यस्यास्तया। अनेन। यकृतबंधविशेषोद्दिष्टितः। यद्वा। नक्षरयोः रणितौ शब्दायमानौ नूपुरौ यया उत्सर्पः। एतेन पुरुषायितं नामकं नाम विपरीतरताभिप्रायेणोक्तं। इत्युक्तं रतिरहस्ये। चक्रवद्भ्रमति कुंचितो प्रिकान्ता मरं मज्जघने समुद्भ्रितेरति कीदृशां श्रीकृष्णं। पुरितः सर्वतः संपूर्णतां नीतः सुरतवितानः रतिविस्तारो येन तं। अनेन नायककरकाश्चि बंधाः कथिताः। पक्षांरैते भ्रमरबंधश्चांतां विदिशा किसलयशायन स्थितां मां स्वयमपि रमइत्यातीतिभावः। पुनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीदृश्या मया। पूर्वं मुखराः शब्दायमाना पश्चाद्विश्रृंखलास्तुरितमुणमेखला कांचियस्या स्तया। अनेन नीरवीलितनना मकं विपरितमुक्तं। तदुक्तं वात्स्यायनीये पुरुषायितप्रकरणे। स्वजघनमेव दोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलितं तद्विजंयंरसिकैः सर्वदाजनैरिति। तत्र सर्वमत्राक्षोमनोरमाकारेण भ्रांख्यातः। मध्यापूर्वपश्चिमं भागेदक्षिणोत्तरभागेच्चेति। रतिरहस्येपि। सर्वत्र कटितटभ्रमो यदि प्रेंपूर्वमितमुक्तमूलितमिति। तत्रापि सर्वत्राकृष्यः स एव भवेदृशं श्रीकृष्णं सकचग्रहं केशग्रहसहितं चुंबनदानयस्यतं। केशग्रहणपूर्वकं चुंबनं विपरीतरत एवोक्तं। तदुक्तं शृंगारे चुंबनं कार्यं पुंसालिंगनपूर्वकं। विपरीतग्रहे नार्याः सकचग्रहचुंबनमिति। मेखलाखड्गबंधे स्याकांचीत्रौलनितंबयोरिति विश्वः। श्रृंखलाकुमुदे कान्यो वल्लेवक्रमवंधनेइति चौ॥ पुनः कीदृश्या मया। रतिसुखसमये सुरतसुखप्राप्तिकाले लोकोत्तरानुभावकांक्षांप्राप्तोयः संभोगशृंगारास्यारसंस्तेन।

रतिसुखसमयरसालसयादरमुकुलितनयनसरोजं॥
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजं॥७॥

लसया मंथरया। कीदृशं श्रीकृष्णं। दरईषत्मुकलितेमुद्रिते नयनसरोजे नेत्रकमले यस्यतं। अनेन हृद्यारानंदावाप्तिर्युगपदेवसूचिता। तदुक्तं रतिरहस्ये। मूर्छना मीलितं चाक्ष्णोश्रुतिकालस्य लक्षणं। सर्वमेतत्तारि ह्यायसाद्यमेतत्सर्यंततरतिपुनः कथंभूतया। निःसहा असमर्था अतएव किसलयरायने निपतिततनुलता यस्यास्तया। अनेन सुरतांतसमयदुक्तः। तदुक्तं अंगेस्वेदः श्लथत्वंच केशावस्त्रादिसंवृतिः। ज्ञातेच्युतिसुखेनार्याविरामेछाच्चजायतेति भारत। तथाचे विपरितरतांते कोकः। स्वेच्छयामिलतिवक्त्रे नत्रबायो भिद्यान्तररति पौरुषामितं। आनतत्वादयरोपितत्वात्। जलंव्यनस्येवकरांकरेणजोत्स्नाकृतानंदमलिंदमापेतिरसार्णवसुधाकर। कीदृशं मधुसूदनं मधुरसोल्लासोदलपटं। अत्रमधुसूदनशब्दोभ्रमरपर्यायः। तदेवचित्रे

केनस्पृश्यति। कीदृशं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदितमनोजं उदितस्तत्कालत्रुटितमुक्ताहारकांचीगुणस्खलत्स्थानसंचट्टनसंजातपयोधर
श्रोणीपरिसरस्पर्शादिनाचपुनराविर्भूतो मनोजः कामो यस्य तं। तस्मिन लज्जितरा
धापीडालोकादिना पुनराविर्भूतो मनोजो यस्य तमिति वा। तदुक्तं वात्स्यायनेन मा अ
चसानेपि च प्रीतिरूपचाररूपस्कृता। स विश्रम कथायोगैः रतिरंजयत्तेपरामिति। न
अनेन द्वयोर्माधुर्यभरः कथितः। अथवा। पूदक्षरश्रुतिहत्योरितिनं चाविर्लुः इति
मधुमाधुर्यं क्षरतीति मधुसूदनः स चासौ मुदितमनोजश्च। मुदितः माधुर्यभरात्
श्रृंगाररसिकोन्नालेनानंदितो मनोजः कामो येनेति। तमित्यर्थः काञ्चेत्थि सामर्थ्यो
तयेनोम मधुना मानं देसं सूदितवानिति मधुसूदन इति। व्याकुर्वति॥७॥ श्रीजयदे
वेति। इदं जयदेवकविना भणितं वर्णितं यदुक्तं

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं॥
सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलं॥८॥ सखि०

ठितायाः गोपवध्वाः राधिकायाः कथितं वचनं तत्सुखं वितनोतु विस्तारयतु। पठतां श्रृण्व
तामिति शेषः। कीदृशं। अतिशयेन मधुरिपोः श्रीकृष्णस्य निधुवनं सुरतक्रीडां शील
यत्स्वरूपं। सलीलमिति लीला श्रृंगारजा क्रिया तत्सहितमित्यर्थः। सालिलयथा स्या
दिति वा। आयोधनं निधुवनं सुरतं समम् इत्यमरः। कथितमिस्तत्र भावेक्तः॥८॥
इदानीमत्युत्कंठया संख्यायमाना गोपिगणवृतं श्रीकृष्णं दृष्ट्वा पराशस्य सखीमाह।
हंसेत्यादिना हे सखि अहं गोविंदकानने पश्याभिहद्यामि च पश्यामीति वर्तमानसामी
प्ये वर्तमानता। कीदृशं कृष्णं व्रजसुंदरीगणवृतं गोपं नपूकदंबपरिवृतं। ननु स
पत्नीभिः परिवृतं दृष्ट्वा कथं नेहर्षः इत्यत आह। माभिति। मामुद्दीक्ष्य दृष्ट्वा पिलज्जितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यवधूभिः परित्यक्तोहमनणीयसाच्छलतयामुग्धंमनोहरंमाननंयस्यतं।तथाचसुंद
रीशातयतोपिसापराधमात्मानंमन्यमान्यःमत्तोबिभेतीतिहर्षोत्कंठचित्तएवेतिभावः॥
पुनःकीदृशं।अनृजुकुटिलाभ्रूवल्लीभ्रूलतायासांसामेनादृशयोयाचलुब्धःगोपवध्वः
तासांवृंदंउत्सारयस्तपसारयतीत्यर्थःसलीलंदृगंतविक्षिप्तंनत्रांतनावलोकितंयस्य
तं।मय्यागतायांप्रियादृगंतचेष्ट्याअन्यगोपीरपसारयंतमित्यर्थः।पुनःकीदृशं॥
हस्तात्स्वतोमद्दर्शनेनसाध्वसवशात्स्खलितोविलासवंशःक्रीडावेणुर्यस्यतं।पुनः
कीदृशं।अतिशायेनस्वे

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारि
दृगंतवीक्षितिमतिस्वेदार्द्रगंडस्थलं।मामुद्वीक्ष्यविलज्जितं
स्मितसुधामुग्धाननंकाननेगोविंदंव्रजसुंदरीगणवृतंपश्यामिच

प्रेमस्वेदैःआर्द्रंगंडस्थलंयस्यतं।सर्वत्रमामुद्वीक्ष्येत्यस्यसंबंधः॥१६॥अनृजुभ्रूवल्लि
मद्बल्लवीत्यनेनतासांसौंदर्यमुक्तं।अथवा।अनृजुःकुटिलामदाधिक्यदर्शनेनच
क्राभ्रूलतायासांतासांवृंदममपसारयतीत्येवंभूतंदृगंतवीक्षितंयस्यतं।अथवा
अनृजुभ्रूवल्लिमत्।कटाक्षिवलक्षितंमयिमयस्यअतएवबल्लवीवृंदमपसारयीत्य
र्थः।अत्रानृजुभ्रूवल्लीतिप्रियादर्शनेनभ्रूनर्तनंकथितं।तत्सौंदर्यमपि।अथवा।
अनृजुभ्रूवल्लिमद्बल्लवीवृंदंतद्बोद्बोधकत्वेनतत्।अधिकंसारिविस्तरणशील
कटाक्षवीक्षितंयस्यतद्भावविस्तारकमित्यर्थः।तासामेवाभिसारकमितिवा।अथ
वा।अनृजुभ्रूवल्लिमद्बल्लवीवृंदेनमद्गुणदर्शनेनोत्सारितुर्ध्वंप्रसरणशीलंदृगंतवी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षितं। कटाक्षोक्षणं यस्यतं। एवं सकलगुणसंपन्ननायकमुकुटमणेर्दर्शनादेव श्रीकृष्णो सा
गरसोत्पत्तिदर्शिता। अत्र राधा मोहना वालंबनविभावो अनकूलप्रतिकूलभावेन वर्त्तीका
रिणि रतिर्थायी भावः। वनादयुद्दीपनविभावाः स्मितकंठाश्लेषानुभावाः स्मितसुधामुग्धा
ननाभिनिदृगंतवीक्षितमित्यनेन च दर्शिता। स्वेदकंपादयः सात्विका अतिस्वेदार्द्रस्फुरितं त्वं
नेषां दर्शितं हलस्नस्तचेलासचमिति वेपथुनोद्दीप्तः। सात्विका साध्वसमिति व्यभिचा
रिभावः लज्जा भयादिका व्यभिचारिणः इति महाकविना श्रीवृंदावनेश्वर्याः परमविद
ग्धायाः त्वयेन सागरस संभ्राट श्रृंगारो वर्णितः। अलमतिविस्तरेण। अनुकूलश्चायं ना
येकः तदुक्तं अनतिरक्ततयानार्यस्यकान्तललनास्पृहः। सीतायां रामवत्सोयमनुकूलः प्र
कीर्तितः। राधायामेव कृष्णस्य सुमसिद्धानुकूलता तदालोके कदाप्यस्य नान्यासंगः स्म
र्यतेदिनितथा। वेदश्रीनिकुरंबचुंबितधियः सौंदर्यसारोज्वलाः कामिन्यः कतिना
पवल्लव पतेर्दीव्यंति गोष्ठांतरे। राधे पुण्यवती त्वमेव मणिरसिक्षामोदरिंखावि नाप्रेंख
तीन परासुयदृक रिपोर्दृश्यात्र दृष्टिमयेति। प्रेयो नामायमलंकारश्चेति। तदुक्तं दंडिना प्री
तिप्रकाशनं यत्तत्प्रेयइत्यभिधीयत इति॥१८॥ पुनर्विभावानाह। दूरालोकेति। हे सखि
स्तोकोलमकः स्तवकः गुच्छो यस्याः एतादृशी यानवका अतिनवा अशोकलतिका नुकं
प्याशोकत्रा रवान स्याः विकाशोत्कृष्टो योदुरालोको दुःखेनालोकितुं शक्यः न नवे कैस्य चु
केनीइतिरखः लतिके सत्रानुकपापांकन्न मह्यस्तपालिता अत एवानुकंप्याशोकल
तिकादुरालोकेति भावः किमपरं कासारः सरसीतत्संबंधी सुदुपवनं तत्संबंधीयः
पवनः वायुः सोपि पथियत्तिदुःखं ददाति। कासारइत्यनेन मरायोज्ञोसंकथितं उपवन
संबंधित्वेन सौगंध्यं मांद्यं च ध्वनितं। यतो वृक्षैरूपहतगतित्वेन मंद एव वायुर्भवता
निअथवा स्तोकस्यादिवार्येरच विशेषणे। स्तदास्तोकस्तवकनवकाशोकलतिका विकारी

[illegible]

Dr. Urmila Sharma Collection, Varanasi

यतीसन्नयः।नन्वृषिमुखमागछनपवनोंचलादिनानिवार्यनामिस्यतआह।दुरालो
कायतीद्रियरूसर्थः।नथाचाकस्मादेवापतन्नदृश्यतनतिभावः।अपिद्राघेनन्तद्विकोशान्ता
ग्रोकलनिकापिव्यथयतीतिध्वनितं।अपिचेयंत्रिखरिणीगोवर्धपर्वतेवर्तमानात्चूतानां
नासाम्राणांमुकुलप्रसूतिः।कुअलोद्गमोपिनसुखयति।विकोद्रग्यांतुकोवेद।किमिति
ध्यतिःस्यपिध्वनितं।अथवा।कीदृशामुकुलप्रसूतिः।त्रिखरिणीप्रशस्तापभागवतीस
र्थः।त्रिखरिणीतिमत्वर्थासायामिनिः।अथवा।त्रिखरिणीमल्लिकानसुखयतीसर्थः।भ्रा
म्यतीनांभृंगीणांभ्रमरांगनानांरणितैःगुंजितैःरमणीयापरं।गांगनानांभ्रमणंनायकान्वे
ष्यमाणार्थमितिध्वनितं।त्रिखरिणीनामकछंदउपपिसूचितं।स्तोकोल्पेचातकेतिविश्वः।

दुरालोकोस्तोकस्तबकनवकाशोककलिकारसःकासाराः पवनपवनो
पिव्यथयति।अपिभ्राम्यद्भृंगीरणितरमणीयानमुकुलप्रसूति
श्चूतानांसखिशिखरिणीयंसुखयति॥१७॥ साकूतस्मितमाकुलाकुलगल
द्धम्मिल्लमीनन्मूपक्ष्मीकमलीकदर्शितभुजामूलार्धदृष्टस्तनं।गोपीनांनिभृतंनिरीक्ष्यग
मिताकांक्षश्चिरंचिंतयन्नंतर्मुग्धमनोहरंहरतुवःक्लेशंनवःकेशवः॥१८॥इतिद्वितीयसर्गः॥ ध्या
तिष्मतीवक्षसःस्वावृक्षीप्रियैःगुष्मरंभ्रमरतेमल्लिकायांसप्रोक्तात्रिखरिणीबुधैरितिवि
श्वः॥१७॥साकूतेति।केशवोहरिःयुष्माकंक्लेशंहरतु।किंलक्षणः।गमिताकांक्षःश्रीराधा
यांप्रापिताभिलाषः।अन्यासुगोपीषुतदर्शनात्।गमितानिरस्ताकांक्षायस्यसः।तिकिं
कुर्वन्।निभृतंयथास्यात्तथानिरीक्ष्यनिभृतंरहस्यभावप्रकाशनमितिया।निरीक्ष्येतिवा
अंतर्हृदयेचिरंचिंतयन्।किंनिरीक्ष्यसापेक्षायामाह।साकूतस्मितंसाभिप्रायस्मितं
पुनःकिं।आकुलाकुलगलद्धम्मिल्लं।आकुलाकुलोसतस्तःगलन्धम्मिल्लःकेशपाशोयत्तं।कामि
द्रेकाद्रोमद्भ्रमादिहेतुना।पुनःकिंउल्लासितभ्रूवल्लीकंउल्लासितभ्रूवल्लीकं।अलीकदर्शितभुजामू
लार्धदृष्टस्तनं।अलीकेनछलेनदर्शिताःभुजामूलार्धदृष्टस्तनाःयत्रकर्मणितत्।अत्रार्धशब्दो
दृष्टस्तनाभ्यांसंबध्यते।हस्तौचस्तनौचेतिद्वंद्वसमासःजघनादिर्घोजेनभुजामूला
र्धदृष्टस्तनप्रकटनमिति।

CC0. In Public Domain, Digitizagtion by eGangotri

भावः। किं वार्धजन्मणमप्यत्र ज्ञेयं। तदुक्तं। वामबाहुः शिरो लग्नो यत्र वामं स्तनोन्नतिः साल सकूविलासं च तदुक्तं स्वर्धजन्मणमिति। का सामित्यत आह। गोपीनां। किंभूतं तत्स्वष्टय। मुग्धमनोहरमिति। मुग्धानां मनो हरतीति तथा। किंलक्षणो हरिः। नवस्तरुणः। तरुणं दृष्ट्वा स्त्रीणां कामविकारो जायते इति। अथवा। नवः श्रीराधां दृष्ट्वा न्यादृशा जातः। अत्यद्भुतगुणप्रकटनात्। अथवा। नवः नूयते नायकगुणैः स्तूयत इति निस्तनूत नर इति वा। निस्तनुभूतस्यापि नानुभूतइवि प्रतीतेः। तथा। कुलवरतनुधर्मग्रामवृंदानि भिंदन्सुमुखि निशितदीर्घापांगटंकच्छटाभिः। युगपदयमपूर्वकः पुरो विश्वकर्मा मरकतमणिलक्षैः कोष्ठकश्रेणि चिनोति। निश्चतवेश्मोप्रकाशमितिव्याख्याने साकूतस्मितेत्यादि चतुर्णामपि पदानां भावविशेषणत्वं। मुग्धमनोहरमितिच क्रियाविशेषणं चिरं चिन्तयत् श्रीराधामिति यावत्। इति श्रीतिप्रियजनानां॥

केसारिरपि संसारवासनाबद्धशृंखलां। राधामाधाय हृदये तत्याज व्रजसुंदरीः॥१॥

केशापहारी केशवो यत्र तादृशा श्रीराधादर्शनेन आह्लादेन गतक्लेश इति वा॥१८॥ इति अष्टप्रबंधः॥ ॥इति श्रीगीतगोविंदे व्याख्यामां जयदेवकृतअक्लेशकेशवो नाम द्वितीयः सर्गः॥२॥ ॥सर्गद्वयेन श्रीराधायाः श्रीकृष्णविषयिणी मुत्कंठा मुत्कासे प्रति श्रीकृष्णस्यापि तस्या माह। कंसारिरपीत्यादि। कंसारिरपि श्रीकृष्णोपि व्रजसुंदरीः तत्याज्य। त्यागे हेतुमाह। राधामिति। राधां हृदये आधाय आरोप्य सौदर्यवनी वर्त्स्थिरपि तत्याजेति। श्रीकृष्णस्य राधया मनुरागाजिशयो ध्वनितः। कीदृशीं राधां संस्कारविषयिणी या वासना संस्कारः तस्य बंधाय श्रृंखलामिव। अनेन अभिलाषाख्या प्रथमावस्था कथिता। तल्लक्षणं कथितं। प्राक्। कित्वासंगमोपायरचिता प्रारब्धव्यवसायतः संकल्पेच्छा समुद्भूतिरभिलाषोत्र विक्रया। प्रवेशनिर्गमौ तूर्ष्णीं दृष्टिरूपथगामिनी। रागप्रकाशनपराश्लेषा स्वात्मप्रसाधनं। व्याजोक यत्र विज

Dr. Urmila Sharma Collection, Varanasi

इतिसकार्यस्यास्यसर्वास्वप्यवस्थासुप्रवेशोत्रयः। प्रथमकारणत्वात्प्रम्णोमाधुर्यभरसंपादकत्वाच्चेति। अथवा। सम्यक्सारः संसारः आनंदचिन्मयमधुरास्वादरसः। तद्विषयकत्वात्। तद्विषयिणीयावासनानित्यसंस्कारस्तस्मिन्बधायत्। शृंखलामिवनिगडरूपामिवेत्यर्थः। उक्तंच। आनंदचिन्मयरसप्रतिभाविताभिस्ताभिर्यएवनिजरूपतयाकलाभिः। गोलोकएवनिवसत्यखिलात्मभूतोगोविंदमादिपुरुषंतमहंभजामीतिब्रह्मसंहितायां। अथवा सर्वात्मभावेनहरिस्मरणंश्रीराधायामिति संसारः तद्विषयिणीयावासनानिरंतराहृदयवृत्तिः तयाबंधायास्वकृतीकारायशृंखलामिव। तथाचकंसुखंसारयतिविस्तारयतीतिकंसारिः। उणादिकरूणप्रत्ययः। कंसोपियस्माद्बिभेतीतिसामर्थ्याद्योतनायकंसारिरिति। उक्तंच। भयात्कंसइतिश्रृंखलापुंस्करीनस्त्रबंधनेनिगडेप्यथशृंखलइत्यमरः॥१९॥

इतस्ततस्तामनुसृत्यराधिकामनंगबाणव्रणखिन्नमानसः।
कृतानुतापः सकलिंदनंदिनीतटांतकुंजेविषसादमाधवः॥२०

पुनः किंतवांस्तत्राह। समाधवः। कलिंदनंदिन्याः यमुनायाः तटांतकुंजेतीरप्रांतलतापिहितोदरगृहेविषसादविषादंचकार। अथमाधवपदेनमालक्ष्मीः तस्याधवः स्वामीअपिविरहव्याकुलोबभूवेतिराधयाः सौभाग्यंध्वनितंकिंकृत्वा। इतस्ततस्तेनुतेषुसंकेतस्थानेषुतामविलक्षणपरित्यागेनस्वहृदिविनिहितांराधिकांअनुसृत्यान्विष्य। कीदृशः अनंगः कामः तस्यबाणस्यव्रणक्षतंतेनखिन्नंदुःखितंमानसंयस्यसः पुनः कीदृशः। कृतानुतापः पूर्वमेवकथंमयानानुनीयानीतेतिदीनीहूनाकथमनस्यात्तुश्चाक्षयतइतिपश्चात्तापः कृतोयेनसः। अनंगपदेनानिवार्यत्वंध्वनितं। अनेनश्लोकेनविनाख्याद्वितीयावस्थाकथिता। तल्लक्षणंकथितंप्राक्। यथाचसंतेवासतीत्यादिनाराधायाअनुसरणंकथितं। तथैवात्रइतस्ततस्तामित्यादिनाश्रीकृष्णस्यानुसरणंदर्शितं॥२०॥ इदानींकृतानुतापइतियदुक्तंतदेवगीतेनवर्णयति। मामियमित्यादिना।

CC0. In Public Domain, Digitizagtion by eGangotri

ध्रुवपदं। गीतस्यास्य गुर्जरादिरागः। तालः प्रतिमठः। तयोर्लक्षणं तु कथितं तुत्रा कृ गीतार्थस्तु। हरहर हा कष्टं। सा मत्प्राणकोटिवल्लभा प्रख्यातगुणा राधा हतादर तया न कृ बहुमानतया कुपितेव गता। विरहेण कुपितेव स्फुटं। प्रणययोगेन सम म कोपाभावात्। व्यभिचारिभावोयं कोप इति ज्ञेयं इति ध्रुवपदं। ननु सा कुपिता गतेति कथं त्वया ज्ञाचमित्यत आह। मामियमित्यादि। मां च वधूनिचयेन गोपवधूसमूहेन वृतं वेष्टितं विलोक्य दृष्ट्वा चलिता प्रस्थिता। विलोक्येत्यव्यवहितं पूर्वकाले कालप्रत्ययः। तेन गोपवधूवेष्टितं मां दृष्ट्वा अव्यवहितकाल एव यतश्चलिता तेन ज्ञायते कुपितेति भावः। ननु सा गच्छंती किमिति त्वया न निवारितेत्यत आह। सापराधतयेति।

मामियं चलिता विलोक्य वृतं वधूनिचयेन॥ सापराधतया मयापि न वारितातिभयेन॥१॥ हरिहर हतादरतया गता सा कुपितेव॥ ॥ध्रु०॥

मया अतिभयेनातित्रासेनापि सा ज्ञाननिवारिता॥ अस्या अग्रे कथं वक्तुं शक्यत इति भये हेतुमाह। सापराधयेति। अपराधो राधां विहायान्यगोपीभिः सह क्रीडारूपः तद्युक्ततया॥१॥ किं करिष्यतीति। सा चिरं विरहेण चिरकालान मद्विश्लेषेण किं करिष्यति। विरहतापव्रा सर्वथा कमुपायं करिष्यतीत्यर्थः। अनेन विरहमहाज्वालामवधार्य तद्दुःखाक्रांततेन सुदृढप्रणयोत्कर्षाद् द्योतितः। तथा। यत्ते सुजातचरणांबुरुहस्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेषु। तेनाटवीमटसि तद्व्यथते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः॥ इति। अथवा चिरं विरहेण तप्तमां ज्ञात्वा किं मामंगीकारं करिष्यति यथा कथं चित्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्पीतिशेषः किमिति वितर्के अत्र क्षणस्यापि विश्लेषे बहुकालस्फूर्तिर्द्योतिता श्रीभागवते। क्षणं युगशतमिव यासां येन विना भवत्। अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतामिति च। आदिमहानुभावस्यानुभावोयं चिरमित्यनेन कथितः।
व अथवा किं दिष्यति अपराधक्षमापनार्थं चरणे निपतितं मां दृष्ट्वा किं कोपेन तिरस्कारवचनमपि कथयिष्यति। यद्वा किं मया सह कदाचिन्माधूर्यं च भिण्या याण्या सद्वार्तां करिष्यति। किं मम सकथां वावदिष्यति दोषान्वा वदिष्यतीत्यर्थः। अथवा मयि चाटुभिर्मिलिते किं कोपादिकं करिष्यति किं परुषं वा वदिष्यति। अपि तु कोपं विहाय प्रसन्ना सती मधुरमेव वदिष्यति। स्वधः। एवमानादि प्रकरणेस्मिन्

किं करिष्यति किं वदिष्यति सा चिरं विरहेण।
किं जनेन धनेन किं मम जीवितेन गृहेण सुखेन ॥२॥

रसे मुनिराहहारि चंद्रो। जयदेवेन च अत्रैव श्रीकृष्णस्य रसास्वादलीलामयमूर्तेर्विरहूपा चेष्टितं निरूपितं। तेन एषु व्याख्यानेषु कल्पनानानाशंकनीया नन्वेतावतां तस्यामेव कोवाग्रहः अन्यगोपीजनानुशीलनेन चित व्यावर्तनं कर्तव्यमित्यत आह। किं जनेनेति। तया विना मम जनेन गोपीरूपपरिजनेन किं गोपांगनारूपः परिजनो मम किंचित्करइत्यर्थः। जनेनात्र बपरिजनेन किमिति वा। तद्वियोग सर्व परिजनत्यागात्। अपि च धनेन किं। धनेन पितुः श्रीव्रजेश्वरस्याखिललोकातिशायिन्या संपत्या मम किं न किमपीत्यर्थः। तद्विरहे विविध विचित्रालंकरणानामपि संतापकत्वेन परित्यागात्। अतः सैव मम भूषणरूपा महाधनरूपा वेति भावः। वक्ष्यति चाग्रेव मसी सादि। ननु धनेन विना ग्रहसौख्यं न स्यादिति चेत्तत्राह गृहेन किं तया विना मम गृहे किं प्रयोजनमित्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नद्वियोगेनवनवासांगीकारात्। ननु सुखास्यदं गृहं तेन विना सुखं न स्यादत आह। मम सुखे न किं। तया विना अन्यसुखेन मम संबंधि सुखेन मम किं सुखं तद्दुःखानुभवेन सुखप्रदानामपि दुःखप्रदत्वात्। तत्सुखेनैव मम सुखमित्यर्थः। गृहेनेति पाठे मम जीवितेन किं दुःखासहिष्णुतया मम जीवितमप्यकिंचित्करमित्यर्थः। स्मृत्याख्या तृतीयावस्थेयं कथिता। तदुक्तं रसार्णवसुधाकरे। अर्थानामनुभूतानां देशकालानुवर्तिनां। सातत्येन परामर्शो मनसः स्यादनुस्मृतिः। अत्रानुभावा निश्वास ध्यान कस्पविहस्तता। चाप्यासनादिविश्लेषद्वाद्याः स्मरकल्पिताः। इ। सेवं तां विना सर्वेषां दुःखरूपत्वं कथि

चिंतयामि तदाननं कुटिल भ्रु कोप भरेण॥ शोण

पद्ममिव परिभ्रमतो कुलं भ्रमरेण॥ ३॥

ति मित्ति। ३। इदानीं तद्दुःखाक्रांतस्यापि कुपितायाअपि तस्या एवैवं चिंतनपरत्वेन प्रेमसौष्ठवं दर्शयति। चिंतयामीति। अहं तदाननं चिंतयामि स्मरामि। कीदृशं। रोषभरेण कोपातिशयेन कुटिला कुटिला भ्रूर्यत्र। तादृशं। किमिव। उपरि भ्रमता संचरता भ्रमरेण आकुलं व्याप्तं शोणपद्ममिव रक्तपद्ममिव। अत्र रोषारुणे मुखे शोणपद्मतादृशं बोध्यं वारंवार रोषवक्री भवतां भ्रुवां भ्रमद्भ्रमरोपमा बोद्धव्या। अनेन गुणकीर्तनं स्याच्चतुर्थ्यवस्था कथिता। तदुक्तं। अंगप्रत्यंग लीलाभिर्वाक्चेष्टाहसितेक्षितैः। नतस्य सदृशः कश्चिदित्यादिकं गुणकीर्तनमिति। शोणः कोकनदच्छविरस्मरः। अनेन व्यभिचारि सौंदर्यं कथितं। क्रोधस्यापि शोभाप्रदत्वात्। किंच माधुर्यं नामेत दुक्तं तदुक्तं। माधुर्यं नाम चेष्टितानां सर्वावस्थासु चारुतेति। ३। नामहमित्यादि। अहं वने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंतामनुसरामि। किमिति तस्याः अनुसरणं करोमि। हे इ किं वृथा विलपामि किमि
ति वृथा विलापं करोमि हृदि संगता हृदये लग्नां तामनीत्वां निरंतरं पत्रा मतिशयेन
रमयामि क्रीडयामि वियोगे संयोगस्फूर्तिर्महाभाव विकारोयं। अथवा किंनाद्रः
प्रश्नो। अहं तां हृदि संगतां अनित्रां किं रमयामि किं वनेतो अनुसरामि किं वृथा विल
पामि स्वर्थः॥४॥ तन्वीति। हे तन्वि कृशांगि तव हृदयं असूयया मयि दोषाविष्कर
णे खिन्न खेदयुक्तं आकलयामि पश्यामि। अनामीत्यर्थः। इयं चोद्वेगावस्था। तदुक्तं
शृंगार तिलके। यस्मिन्नम्यं मरस्यं स्यान्न च हर्षाय किंचन विद्वेषः प्राणितव्येपि स
उद्वेगः स्मृतो यथे। इयं तु श्री राधायां युज्यते।

तामहं हृदि संगतामनिशं भृशं रमयामि। किं वनेनुसरामि
तामिह किं च विलपामि॥४॥ तन्वि खिन्नमसूयया हृदयं तवा
कलयामि॥ तन्न वेद्मि कुतो गतासि न तेन तेनुनयामि॥५॥

तथा च मनसः खेदयुक्तत्वात् न्वीति संबोधनमुचितमेवेति। तन्न वेद्मि त्वं कुतो ग
तासि तदहं न वेद्मि तेन तव नते न प्रणत्या अनुनयामि सान्त्वयामि स्वर्थः कचित्तु तेति पाठः।
तदा तेनु तेन तव स्वसा गनुनयामि सान्त्वयामि स्वर्थः। अथवा नु इति वितर्के। तेनेति लक्ष
णे त्वयं। तथा च स्वां मार्गलक्ष्मीं कस्य गतासि तन्न तां मार्गलक्ष्मी कस्य गतासि तेनुनयामि
न वा नुनयं करोमीति संबंधमात्रविवक्षायां षष्ठी। अनेन विलापावस्था कथिता। त
दुक्तं शृंगार इ तिलके वक्ष्मी ति मनो यस्मिन्नसौ सुख्यादित स्ततः। वाचः प्रियाश्रया एव
स प्रलापः स्मृतो यथेति॥५॥ दृश्यसइति। अपि हे सुंदरि पुरेव पूर्वमिव ससंभ्रमं सादरं
भंग्या सचकितं वा परिरंभणमालिंगनं किं किमिति न ददासि न प्रयच्छसी स्वर्थः॥६॥

Dr. Urmila Sharma Collection, Varanasi

ससंभ्रममिति स्वामिन्यपि प्रियतमाश्लेषे तद्वेगादिव्यञ्जनाद्विषकानुभावविशेषो ध्वनि
तः। तदुक्तं। इष्टेपि मानवर्गाभ्यो विवेकः स्यादनादर इति। तथा। प्रियोक्तिलक्षेण वि
पक्षसन्निधौ स्वीकारितां पश्यन्त्रिखंडमौलिना। त्रामात्ति वामा हृदयंगमामभिव्यंजं दद
यायनिरासलीलयेति। यथा वा। स्फुरत्सयेति ष्टन्सास्वित्त वमुखक्षिप्तनयनः प्रतीक्षीसस्यां
रुसायं भचदवसरस्याप्यदमनः दर्शार्वगीप्यामोद्गरण गुरुहेलागहनयावं संतीवक्षी
बेलमिह वनमालां रचयसीति। संमे ममपुरतो यतः दृश्यसे गतागतं यातायातं विदधा
सि करोषि चिरहिणो हि चितानुषंगात् सर्वतस्तामेव पश्यति। यथा। प्रासादे सा दिशि दि
शि तु सा पृष्ठतः सा पुरः सा पर्यंके सा पथि च सा तद्वियोगातुरस्य हंहो चेतः प्रकृतिर
परा नास्ति मे कापि सा सा सा सा जगति सकले कोयमद्वैतवादः। दो क्षम्यतामिति॥ ॥

दृश्यसे पुरतो गतागतमेव मे विदधासि। किं पुरेव ससंभ्रमं परिरं
भणं न ददासि। ६। क्षम्यतामपरं कदापि तवेदृशं न करोमि। देहि
सुंदरि दर्शनं मम मन्मथेन दुनोमि। ७। वर्णितं जयदेवकेन हरे
रिदं प्रणतेन। किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन। ८।

तिहे सुंदरि दर्शनीयरूपे क्षम्यतां मम अपराधं क्षमस्व। कदापि तवेदृशं अपरं विप्रियं
न करोमि न करिष्यामि इयं चोन्मादावस्था तदुक्तं रसार्णवसुधाकरे। अतस्मिंस्तदिति भ्रांति
रुन्मादो विरहोद्भव इति। पुनः किंचित्संजातविवेकः कथयति। देहीति हे सुंदरि मम इति संबंध
मात्रे षष्ठी दर्शनं देहि प्रयच्छ। तद्दर्शनसंप्रदानत्वाद्योगापि त्वं मम रूपया दर्शनं देहि इत्यो
पि न चतुर्थी स्या। ते भाच सुंदरीति। संबोधनेन प्रोत्साहयति। मन्मथेन कामेनाहं दुनोमि
संतप्तो भवामि। ७। वर्णितमिति जयदेवकेन जयदेवेन। स्वार्थे कः। इदं हरेः कृष्णस्य रितं वर्णितं
कीदृशेन प्रणतेन अथवा हरिमि स्वर्यं प्रवणेनेति पाठे हरिपरायणेनेत्यर्थः। पुनः कीदृशेन

[illegible]

CC0. In Public Domain, Digitizagtion by eGangotri

रमणेनचंद्रेनयथासमुद्रोस्तनेनचंद्रेणेतस्येन्नतिः क्रियते। तथास्यकुलस्योन्नतिःजयदेव
कृतेनेतिचंद्रसाम्यं। किंतुबिल्वनामजयदेवकुलोत्पन्नकश्चित्किंदबिल्वनामाकश्चिद्भागवतः
समुद्भवः॥ कश्चिश्चजयदेवपूर्वपुरुषइतिकथयंति॥ गौरिदुरेणतिलकोहरिरोहिणीरोर
तिहरावली। तथाचपमावस्याउत्कर्षकथनायरोहिणीरमणेस्कृतं॥ ८॥ इतिसप्तमप्रबंधः॥
इदानीकामएवमेदुःखंप्रयच्छतीतितमेवोपालंभगोचरंकरोमीत्याशयनाहा। हृदीत्यादि।
हेअनंगकदर्पमयिनप्रहरप्रहारंमाकुरु। किमितिवितर्केमयहरभ्रांत्यासामाहादेवभ्रमे
णक्रुधाक्रोधात्वंधावसीतिकिमुवितर्कयामि। अथवाउदितिहेअनंगहरभ्रांत्यामपिकिं
किमितिधावसि। कीदृशेमयिप्रियारहितेविरहितोहरःसर्वदाप्रियायुक्तेहलघुना। प्रिया
रविहितइतिमयिहरभ्रमोनयुक्तइतिभावः। यथाचप्रियाविरहसंतप्तमयिप्रहारोन॥

हृदिबिसलताहारोनायंभुजंगमनायकः कुवलयदलश्रेणीकंठेनसागरलद्युतिः।
मलयजरजोनेदंभस्मप्रियारहितेमयिप्रहरनहरभ्रांत्यानंगक्रुधाकिमुधावसि॥ १॥

चितध्वनितं। कामःपूर्वंहरेणतच्छरीरंदग्ध्वागरहितःकृतइतिहरस्यकामस्यमहद्वैरसूचना
यानंगपदेनसंबोधनं। भ्रमबीजंनिरस्यति। हृदयेबिसलतायाःमृणाललतायाःहारःतद्वि
रहजन्यसंतापशांत्यर्थंधृतः। ननुभुजंगमनायकःसर्पराजोवासुकिः। रयंचकंठेकुवलय
पदलानांनीलोत्पलपत्राणांश्रेणीपंक्तिःशैत्यायधृता। ननुसागरलद्युतिः। विषकांतिःद
दंसर्वांगितापशांत्यर्थंधृतंमलयजरजश्चंदनधूलिः। ननुभस्मविभूतिः। अंगेलिप्तःप्रतिपि
लचंदनद्रवोपिविहारहता। पश्चाद्धूलिभूतइतिरजःपदेनसूचितं। तस्माद्बिसलतायांत्रोस्य
दीर्घत्वादिदर्शनात्रवासुकिभ्रमः। नीलोत्पलदलपंक्तौश्यामत्वादिधर्मदर्शनाद्गरलभ्रम
चंदनरजसिभस्मभ्रमश्चा मयिमहादेवभ्रमःतवनयुक्तइतिभावः। अयंचभ्रांतिमानलं
कारः। सादृश्याद्वस्त्वंतरप्रतीतिर्भ्रांतिमानितितल्लक्षणात्। वितर्केकिंकिमुतत्वेस्मर२३
संबुधोरुषात्कोचेति विश्वः॥ २॥ कुसुमसायकेनक ःप्रसिद्धः। अतइमानेवकृतमंज

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रीरूपा बाणान् धनुष्यारोप्यमांतापयिष्यतीति शंकया पुनरपि कामायैच दैन्यं करोतीपा
णाविसादिना। हे मनसिज मदन अमुं पुरस्थितं चूतसायकमाम्रपुष्परूपबाणं पाणौ ह
स्ते माकुरु। वसंतकालीनपुष्पोद्गमंदृष्ट्वा हस्ते चापं धनुमरोपय प्रसंचायुक्तं माकुरु। यद्वा
चूतसायकं हस्ते माकुरु हस्तेपि चेत्करार्पितदा मुंसायकं मा आरोपयामि संदेहीत्यर्थः। अ
त्र मनसिजपदेन मन्मसो जातस्य ते मत्संतापकारि च मनुचितमितिध्वनितं हे क्रीडानि
र्जितविश्व। क्रीडया लीलया निर्जितं विश्वं जगद्येन तादृशा। मूर्छितस्य मूर्छां प्राप्तस्य जन
स्य मादृशस्य आघातेन नव किं पौरुषं अपितु न किमपीत्यर्थः। अथवा मूर्छित जाना घा

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्वमूर्छि
तं जनाघातेन किं पौरुषं। तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाशु
गश्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते॥ २४॥ ॥ ॥

षमित्यर्थः। मूर्छितत्वे हेतुमाह। तस्या एवेति। तस्या एव मृगीदृशो हरिणीदृशः। तस्या ए
वेति विरहाधिक्येन राधानामग्रहणान्नाम्नि प्रतिपाद्यते। प्रेंखंतः प्रसर्पंतो ये कटाक्षाः त
एव आशुगाः बाणास्तेषां श्रेणीभिः पंक्तिभिः जर्जरितं खंडखंडीकृतं मनो मनागपि स्वल्प
मपि न संधुक्षते न स्वस्थं भवति। अद्यापि पर्यंतमपि धुक्षधिक्षसंदीपनक्लेशनजीवने
ष्विति धातुरनुसारात् न संधुक्षते। न जीवत्यर्थः। द्वितीया तथा च। तत्कटाक्षरूपबाणैरहं मू
र्छितः। संप्रति मयि चूतमंजरीरूपे सायकप्रहारो मृतमारणमाचरतीति भावः। लीलयैव
येन विश्वमपि जितं तस्य ते मूर्छितजने पुप्रहारो यन्मोहनिकरस्तदपि ध्वनितं सायकः शरः ख
ड्गो रितिविश्वः। तथा स्त्रियां धनुश्चापाविष्वासरः। किं पौरुषमिति द्वितीयव्याख्यानप
क्षे किंक्षेप इत्यनेन समासः। आशुगो मारुते बाणे इति विश्वः॥ २४॥ ननु तत्कटाक्षादिस्म

Dr. Urmila Sharma Collection, Varanasi

रणादेवनवदुःखंभवतिकामस्यतत्रकोपराधइत्यतआह। भ्रूपल्लवमिति। किंभूतास्येपे
यस्याराधायाः स्मरेण कामेन अस्त्राण्यर्पितानि स्थापितानि तत्तद्याभिमानस्त्राणि
वीरेणहस्तेस्थापयितुमुचितानि लुनेत्रस्तत्राह। निर्जितेत्यादि। निर्जितंजगंत्तिये
स्तानि। तथाचैरेवाभिर्जगज्जयं स्यात्तत्र स्थापितानीति भावः। नत्वत्र किंभितिनस्थापि
ता नास्तत्थाह। अनंगेत्यादि। अनंगस्य कामस्य जयाय यजंगमदेवतायां गमनशीलदेवता
यां तथा च तयैव त्रैलोक्यजयस्य निर्दतानि जातानि प्रयोजनानि त्रेयस्थापितानीति
भावः। देवत्रपाद्यदस्तं दीयते तत्केनापि न प्रतिहन्तुं शक्यत इति ध्वनितं। अहो देवतायाः म
हात्म्यं अंगाधिनैवैयत्प्रसादेनजगज्जितमतएवानंगस्त्वजितत्वादेवदेवेशः श्रीकृष्णो निहायत्तां

भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण तस्या
मनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि ॥२९॥

निक्षेपां कानिताम्यस्त्राणि इत्यतआह। भ्रूपल्लवमित्यादि। भ्रूपल्लवमेव तदेव धनुः। अपां
गतरंगितानि कटाक्षस्य गतागतानि बाणाः श्रवणपालिः कर्णलताप्रांत एव गुणः प्रत्यं
चा। घननीलस्निग्धसार्द्रत्वैः पल्लवत्वेन निरूपणं। वक्रत्वेन धनुष्ट्वेन निरूपिता। अपांग
मंगहीनेस्याच्चेत्रांतेतिलके पिचेत्ति विश्वः। पालि कर्णलताग्रे सीमांकावेत्यपभ्रंशयोरि
ति चा॥ संप्रति राधांगविलसितान्येव स्मरबाणरूपाणि मां पीडयंतीति तस्या एवो
पालंकरोमीत्याशयेन काममुपेक्ष्य पुरःस्थितामिव राधां संबोध्याह। भ्रूचापेति। भ्रूचा
पे भ्रूरूपे धनुषि निहितोर्पितः कटाक्षविशिखः कटाक्षरूपो बाणो मर्मव्यथां मम मर्म
पीडां निमातु करोतु धनुष्यारोपितस्य बाणस्य परमर्मपीडनमेव धर्म इति। तदुचि
तमेव। अथच कुटिलो वक्रः श्यामात्मा श्यामः आत्मा स्वरूपं यस्य एतादृशः कबरी
भारोपि प्रथितवेणी केशसंचयोपि मारोद्यमं मारायमारणाय उद्यमं पराक्रमं क

रोतु। अथवा मारस्य कामस्य उद्यमं करोतु यो नर्मलिनं कुटिलश्च भवति। सोप्यमा
रणाय यततद्‌रूपिनानुचितं अथवा। हेतन्वि अयं बिंबाधरो बिंबफलतुल्योध
रो मोहं मूर्छा तनुतां तनोतु। कीदृशो रागगयान् रक्तता विशिष्टः इदमपिनानुचिंन
यतो यो रागवान्मा तस्य युक्तः स परं मोहं करोत्येवेति। अयं तव सद्वृत्तो सद्वर्तुलः
स्तनमंडलः कुचविस्तारो मम प्राणैः कथं किमिति क्रीडति प्राणग्रहणरूपां क्रीडां
किमिति करोति। सद्वृत्तस्य सच्चरितस्य परप्राणग्राहित्वं मनुचितमिति भावः।
विरोधनामायमलंकारः।। सद्वृत्तरूपगुणस्य परप्राणग्रहणक्रियाविरोध
कथनात्। तदुक्तं काव्यप्रकाशे। विरोधः सोवि

भ्रूचापनिहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा
कुटिलः करोतु कबरीभारोपि मारोद्यमं मोहं तावदयं च तन्वि
तनुतां बिंबाधरो रागवान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्मम क्रीडति।।२४।।
रोधेपि विरुद्धत्वेन यद्वचः इति। विशिखस्तोमरे शरे इत्यमरः। मारो मृत्यौ विघ्नेनंगे
ति विश्वः। बिंबफले बिंबिकायाः प्रतिबिंबे च मंडले देहच्छायायामपि। रागोनु
रक्तौ मात्सर्ये रंजनेपि निगद्यते इति विश्वः। चरिते वर्तुले वृत्तमिति शाश्वतः। आ
त्मा देह मनो ब्रह्म स्वभाव धृति बुद्धिषु इति विश्वः।।२४।। ननु तस्या अपि नापराधो
न स्मरस्य किं तु तदंगस्पर्शादि विषयालाभात् चंचलं स्वेन लांछनः खीकरोतीत्य
तो नुभूयमानानां मन्वानआह। तानीति। स्पर्शसुखानि तदंगस्पर्शजन्यानि
सुखानिदानीं अनुभूयमानानि तानेव पूर्वानुभूतान्येव एतेन त्वगिंद्रिय ४२।

CC0. In Public Domain, Digitizagtion by eGangotri

विषयलाभः कथितः दृशौ नेत्रयोः तरलाश्चचलाः स्निग्धाः स्नेहगर्भा विभ्रमाः
विलासास्त एव पूर्वानुभूता एव। अनेन चक्षुर्विषयलाभ उक्तः। वक्त्राम्बुजसौ
रभं तस्या मुखपद्मसौरभं तद्वा। अनेन घ्राणस्य विषयप्राप्तिरुक्ता। गिरां तद्व
चसां सुधौघमृतं स्पंदते स्रवसे चं[illegible] लोचकी मा वक्रत्वमिदानीं श्रोत्रेण गृ
ह्यमाणः स पूर्वानुभूत एवानेन श्रोत्रेन्द्रियस्य विषयसान्निध्यमुक्तं। बिंबा
धरमाधुरी तस्याः बिंबफलस्याधरस्य माधुरी मधुरता मधुनाम सा स्वाद्य
माना सैव पूर्वानुभूतेवानेन रसनेन्द्रियविषयलाभ उक्तः। इत्थं च प्रकारेण चि
य संगोपितत दिन्द्रियाणां स्वस्वविषयासक्तावपि माने

ता[illegible] विभ्रमास्त[illegible]
ज सौरभं[illegible] माधुरी[illegible]
बया संगोपि[illegible]

संभन्न नश्वत स्यां राधायां लग्न समाधि तदेकाग्रं यदि हन्तेति खेदत दा विरहस्मा
धिस्तद्विश्लेषजन्यो व्याधिः कथं वर्धते। अपि[illegible] विरोधालंकारसूचनार्थः। बा
ह्येन्द्रियविषयासंगे समाधेरसंभावाद्बाह्येन्द्रियवृत्तिनिरोधे सति मनसा यकाग्र
ता या एव समाधिपदार्थत्वात्तथा चतत्तदिन्द्रियाणां स्वस्वाभिलषितविषयाला
भ एव विरहः संभवति मम च तत्तदिन्द्रियाणां विषयविच्छेदस्याभावान्मनसस्तद्वि
त्तनैकपरत्वात्तया सह विश्लेष एव नास्तीति कथं विरहजन्यव्याधिसंभव इति भ्रा
न्तः। समाधौ व्याधेरनुदय इति ध्वनितं च एवार्थः। गोभस्वरूपसत्सं[illegible]
मया अमीस्मरः। तस्मात्कोऽप्यद्भुतोदुर्वितर्क्यस्त्वत्प्रेमविवर्त इति सिद्धांतः॥२५॥

Dr. Urmila Sharma Collection, Varanasi

इदानीं सर्गांतिमाशिषमाशास्ते। तिर्यगिति। मधुसूदनस्य श्रीकृष्णस्य कटाक्षोर्मि
यः नेत्रांतदर्शनतरंगा वः युष्माकं क्षेमं ददतु कल्याणं प्रयच्छंतु दुरितासद्भावेन
क्षेमदातृत्वं संभवतीति दुरितदारुणसामर्थ्यघातनाय मधुसूदन एदोपादानं अ
त्रिनापल्यं सूचनायेति वा। किंलक्षणः मधुरे अमृतादपि मधुरिमाश्रये राधाया
मुखबिंबमिव तस्मिन् मृदुस्पर्दश्चंचले संमुग्धमनोज्ञे सुंदरं वा यथास्या देवं
कंदलिता पल्लविताः तथा चंदुदर्शनानंतरं गा अतीव पल्लविता भवंतीति कटाक्षाणां
तरंगसाम्यं। कचित्प्रेम्णा कंदलिताः सुमुग्धमधुरे राधाननेंदौ सुधासारे चौम
धूसूदनस्य ददतु क्षेमं कटाक्षोर्मय इति पाठः। तदा किंविशिष्टे मुखेंदौ सुष्टु

तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्‌द्वीतिस्थानकृता
वधानललनालक्षैर्नसंलक्षिताः। संमुग्धं मधुसूदनस्य मधुरे राधा
मुखेंदौ मृदुस्पंदं कंदलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः। २६। तृतियसर्गः।

मुग्धं च तन्मधुरं च तत्र क्षिप्रत्वेन वा प्रियत्वे चेत्यर्थः। मधुरस्तु प्रियेस्वादाविति पुनः
कीदृशो सुधासारे। ननु अन्यासु पतत्सु कथं राधामुखचंद्रएव पल्लविता ऊर्मय अत आ
हा वंशोच्चरद्गीतिस्थाने गुणानपदेषु स्वरग्रामादिषु कृतावधानैः समर्पितचित्तव
तिभिः। ललनालक्षैः कामिनीकदंबैर्न संलक्षिता नावलोकिताः। तथा च सकल एव
कलत्रकदंबो वक्त्राघ्व निमोहितो न किंचिदपश्यदिति तत्रैव पल्लविता इति भावः। वंशापूरणे
स्वभावमनुवर्णयति किंभूतस्य तिर्यक्वक्रः कंठोयस्य विलोलश्चंचलो मौलिः किरीटोय
स्य तरलः उत्तंसः तिर्यक्कंठश्चासौ विलोलमौलिश्चासौ तरलोत्तंसश्चेति कर्मधारयः।
तथाविधस्येत्यर्थः। गीतिर्गानं ललनानुनिबिनीस्मरः। उक्तं सकृद्‌र्णितरेपिसुंद

CC0. In Public Domain, Digitizagtion by eGangotri

रेनायकेपिचेतिधरणि॰कंदलंतुनवांकुरेकलध्वनावुपरागेचनितुम्बिपीडालको
कंठाम्ल ग प्रकाशावीविषुवस्त्रसंकोचलेखायामिति॥२६॥ ॥इतिश्रीगीत॰मुग्ध॰
मधुसूदनोनामतृतीयःसर्गः॥३॥ पूर्वसर्गेश्रीकृष्णस्यविरहजनितावस्थावर्णि
ता॥अत्रतुश्रीराधाविरहावस्थाश्रीकृष्णप्रत्याह॥यमुनेत्यादि॥राधिकायाःसखीमाध
वंश्रीकृष्णंप्राहवक्ष्यमाणमुवाच॥राधिकेत्यनुकंपायांकन्॥कीदृशी॥प्रेमभरेणरा
धाविषयकस्नेहाधिक्येनउद्भ्रांतंउक्षिप्तंचलनादिक्रियांकर्त्तुमशक्यं॥अतएवत
दन्वेषणंविहाययमुनायास्तीरेयद्वानीरनिकुंजंतत्रमंदेनिरुत्साहंआस्थितमा
सीनं॥अमंदमितिक्वचि"नविशेषणंया॥अतिशयव्याकुलांराधांदृष्ट्वाअमंदस्तव
गमोहेतुर्यः॥मंदःखलेमंदगतौमूर्खेस्वैरिणिरोगिणीतिविश्वः॥सत्रेमाभेदरहितं
यूनोर्येद्रावबंधनंद्रुतिरसार्णवसुधाकरे॥रागातदेवगीतेन
यमुनातीरवानीरनिकुंजेमंदमास्थितं॥प्राहप्रेमभरोद्भ्रांतंमाधवंराधिकासखी॥२७॥
दर्शयति॥निंदतीत्यादिना॥ध्रुवपदमिदं॥गानस्यास्यकर्मणाट्रागः॥तल्लक्षणं॥कृपाणपा
णिर्गजदंतपत्रमेकंवहन्दक्षिणकर्णपूरे॥संस्तूयमानःसुरचारणाद्यैःकर्णाटरागोऽग्नि
लिखंनीलद्युतिः॥एकतालीतालः॥तल्लक्षणंकथितंप्राक्॥विरहोत्कंठितानायिकास्यां
नेहागतःसमुचितेपिवासुदेवोप्राणेश्वरोहिगुरुकार्यवशान्नयाः॥
दुर्वारवृत्तविरहज्वरतापितांगीमुत्कंठितांवदतितांभरतःकवीन्द्रः॥गीतार्थस्तु॥हे
माधवसाराधात्वविरहेदीनांदुःखितां॥भवात्कसखीकएवेनितदुःखंजानाति
माधवपदेनकटाक्षितं॥हाकष्टंयदिदुःखितानहिकथंवरिचतितांहिकथंवरिचति
तुदाहा॥त्वयिलीनामग्नाकस्मादिवमनसिजस्यकामस्यविशिखाणास्त्वद्या
दिवाभयेनोमनसोज्ञातइतित्वयिलीनायानतद्भयमितिमनसिजेनेतिपदेनैध्व

Dr. Urmila Sharma Collection, Varanasi

निते। मनुमयिकथंलीनेसनआह। भावनवेति। भावनया सर्वविषयनिंदापूर्व
कत्वात्स्मरणेनेसर्थः। ध्रुवपदं। विषयनिंदामाह। चंदनं मलयजं निंदति विर
हिणा सुपतापकरोत्वधात्री सा धारा निंदां विक्षनीति निंदां करोति। किंच। इं
दुकिरणं सुधांशुकरं अनुलक्षि स्वस्य खेदं कष्टं विंदति। प्राप्नोति तत्राप्यधी
र मन्ये। धीरस्तु कुंकुमस्वल्पं तु नि धैर्यं वतिञ्छिसमरः। अधीरं धैर्यरहितं।
यथा स्यात्तथा निंदति वा। अधीकमीरयति। कामशरानीरयतीति इतिचंदन
विनोषणे वा। अपिच। मलयसमीरं मलया संबंधिवातं। व्यालनिलयमिलने
न व्यालानां सर्पाणां निलयो निवासश्चंदनवृक्षस्तस्य मिलनेन संसर्गेण गर
लमिव विषमिव कलयति मन्यते। चंदनवृक्षस्थितः सर्पैः पीतोद्गीर्णा एते
मलयवायवोऽत एव समीरयति स्या

निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं। व्यालनिलयमिल
नेन गरलमिव कलयति मलयसमीरं॥१॥ सा विरहे तव दीना। माध
व मनसिजविशिखभयादिव भावनया त्वयि लीना॥ ध्रुवपदं।

नास्थानां तरं वस्तु बालकसंभावाद्विषमायाः। कथमन्यथा शरीरसंपर्कादेव मूर्छा
जनयतीति गरलमिव मन्यत इति भावः। तथा च दुःखितस्य विरहिणो हि सुख
हेतवोऽपि दुःखायैव भवतीति ध्वनितं। विरहोत्कंठयेन स्मरणरूपां दशां च प्राप्नोति।
तदुक्तं शृंगारतिलके। दोषाय त्रान्यकार्येषु तदेकाग्रं च मानसं। श्वासैर्मनोरथैश्चापि
चेष्टा तत्स्मरणं यथेति। इंदुर्निंदति पद्मकं दलदलीतल्पं न वा मन्यते कर्पूरं किर
ति षयाति न रति प्रालेयधारागृहे श्वासैः केवलमेव खिद्यति तनूर्जाता व्यसौ
बालिका यत्कोपि सुवासखिस्मरसरवश्चेतस्यमुष्मिन् स्थितः। व्यालो भुजं
गमे क्रूरे श्वापदे दुष्टदंतिमीति विश्वः। गरलं तु विषे नागे गरलं तृणपूलकेति॥१॥

अचिरैरेनिः स्वैरतो हृदये मर्मणि हृदयरूपमर्मस्थाने सजलनलिनीदलजालं ज
लसहितपद्मिनीपत्रसमूहं वर्मकवचं करोति। कीदृशं। विशालं किमर्थमिवाअ
विरलं यथा स्यात्तथा निपतितो यो मदनशरः कामबाणः तस्माद्भवदवनायैव
भवतो रक्षणायैव तस्याः हृदये लसच्चरांति स्व सि अतो अविरलनिपतद्भिर्मद
नशरैस्तैः पीडा माभूदिति कमलिनिपत्रैः सन्नाहमिव करोतीति भावः। केचित्तु की
दृशं वर्म। अविरलनिपतत्तित्तमदनशरादवनाय रक्षणाय भवदिवसंपद्यमान
मिवेति व्याकुर्वंति। अथवा नरस्तेण प्रीतावितिविग्रहप्रकारः। यथा सहस्थलं मर्मस्य
पि विशालं विस्तीर्णमपि भवदवनायेति प्रथममास्थाने सख्याः स्नेहाधिक्यं सूचितं

अविरलनिपतितमदनशरादेव भवदवनाय विशालं हृदयमर्मणि
नर्म करोति सजलनलिनीदलजालं। अथ कुसुमविशिखशरतल्पम
नल्पविलासकलाकमनीयं। व्रतमिव तव परिरंभसुखाय करोति कु

तेन दूतिकर्म कुशालेत्वमपि कथितं। अथ कुसुमेति। सा कुसुमशयनीयं पुष्पशय्यां करो
ति रचयति। कीदृशं। अनल्पविलासकलायां बहुनर्मक्रीडाकलायां कमनीयं कांक्षणीयं।
एवंभूतावस्थायामपि तदागमनाशया। अनुरागयत्नेन कुसुमशय्यामारचय्यत्वमा
गतः तदृष्टिरेव तिष्ठतीति भावः। किमिव। कुसुमविशिखः कामः तस्य ये शराः कुसुमरू
पाः तेषामल्पं शय्या यत्र तादृशं व्रतमिव। किमर्थं। तव परिरंभसुखाय आलिंगनसुखा
भिलाषये तल्पं तु शयनीयं स्यात्तल्पं मदकलत्रयोरिति विश्वः। एभिः षड्भिः पदैरुद्वेगाख्या
पंचम्यवस्था कथिता। सुखस्पर्शं पुष्पमपि बाणतुल्यं भवतीति ध्वनितं। अथवा। सा
अनल्पविलासकला कमनीयं कुसुमशयनीयं तव परिरंभसुखाय कुसुमविशिख
शरतल्पं व्रतमिव करोतीत्यर्थः। अथ वहतीति। सा दिसउदारं सुंदर मानकमलं मुखपद्मं
वहति धारयति। प्रेमागता कदाचित्तेन उदारमिति वा। कीदृशं। वलितं वक्रागतप्रसृ

CC0. In Public Domain, Digitizagtion by eGangotri

णायतिर्यकुसा सारित्ते विलोचने नेत्रे एव जलधारो रसुवर्षिणो मेघै यत्र तादृशं। तत्र नि
रंतराश्रुवर्षिणे न नेत्रयाजलधरत्वेन निरूपणं कमिव चंद्रमिव। कीदृशं। विकरा
लाः विशालाः वायो विधुंतुदस्य राहोर्दंतास्तैर्यद्दलनं पीडनं तस्माद्गलिता प्रच्युता
मृतस्य धारा यतः तादृशं। अत्र मुखस्य विधुना। नेत्रजलस्याचामृतं धारया सादृश्य
वाक्योपमा बोध्या तथा चानेन चैवर्ण्यमिति ध्वनितं विकटः सरे प्रोक्तो विशालवि
करालयोरिति विश्वः। तमस्तु राहुः स्वर्भानिः सैंहिकेयो विधुंतुद इत्यमरः॥४॥ वि
लिखतीति। किं च रहस्ये कांते कुरंगमदेन वस्तूर्या भवंतं लिखे

वहति च वलितविलोचनजलभरमाननकमलमुदारं। विधु
मिव विकटविधुंतुददंतदलनगलितामृतधारं॥ध्रु॥४॥ विलिखति रहसि कुरंगमदे
न भवंतमसमशरभूतं। प्रणमति मकरमधो विनिधाय करेण शरेण चूतं॥५॥

ति। कीदृशं। असमशरभूतं कामरूपिणं तेश्च आसनस्थाने मकरं विनिधाय स्वेनानवके
न च चूतेन नूतनाम्रमंजरीरूपं शरं बाणं च विनिधाय प्रणमति नमस्करोति। मकरवाहनस्त्व
मेव मोक्षमिति संतापयसी निप्रणाम्य प्रेष्ठं हां याचते इति भावः। तथा च वाहनारूढ प्रियत
मः श्रीघ्रमागमिष्यतीति वाहनं लिखितमिति ध्वनितं विरहिणीव्यापारश्च कथितः।
न दाह भरतः। देवतापूजनं कुर्याद् बाह्लिभुजेबलिं। लिखेत्कांतप्रतिकृतिं पाठयेच्छुकसा
रिकाः। गणयेच्चावधिदिनं गीतं गायेत्तदाश्रिकां। एवंविधवियोगेन नयेत्कालं वियोगि
नीति। मृगनाभिर्मृगमदः कस्तूरी गंधधूलिरेवेति हारावली। यद्यपि वियोगिन्याः का
ममूर्तेर्लेखनेन घटते तथाप्यत्र श्रीकृष्णस्य कंदर्परूपत्वात्तदाक्रांतचित्तत्वेन तद्रूपेण
लेखनं॥५॥ प्रतिपदमिति। प्रतिपदमिति स्तन श्रलेती पदं पदं प्रतिवचनं प्रतीति याः
इति निगदति जल्पति। हे माधव तव चरणे अहं पतिता त्वां नमामि। सर्वं। त्वयि विमुखे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निश्लिष्टे सति सुधानिधिरपि अमृतविधिरपि चंद्रोपि तनु धाहं मद्य करिसंतापं तनोति विस्तारयति अतनुदाहं स्मरतापं वा। अतनुयता स्यात् श्वा वा तनुदुलक्ष्म्याः से मायाः लक्ष्म्याः धृवः स्वामी चंद्र समुद्रोत्पन्नत्वात् लक्ष्म्याः सहोदर इति लक्ष्म्यां निकटे स्थिते सति लक्ष्मी सपत्न्यपि मे किमप्यपकर्तुं त्रोनैको तित्वयि प्रतिकूले च सति स्वगिनी सापत्न्यं मयि स्मरं नसुधानिधिरपि मे तनुदाहं तनुतइति माधवपदेन ध्वनितं सुधानिधेः तापकारित्वं विरुद्धमिति विरोधनामायमलंकारः॥ ६॥ ध्याने त्यादि। अनिजायेन दुःखेन प्राप्यं अतीवदुरापं भवंतं ध्यानलयेन एकाग्रतया परः परिकल्प्य अंगीकृत विला। अथवा। अतीवदुरापं भवंतं दोसादिना अतीव दुर्लभं ता। ध्यानलये ना ध्यानं चिंतनं तत्र यो लयः तत्परत्वं तेन पुरोग्रे परिकल्प्य साक्षात्स्थापय मपक्षेतु विलिखति रहसी रूक्षत्वात् पुनः कल्पना। सा विलपति। कुलायेद

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं। त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं॥ ७॥ ध्यानलयेन पुरः परिकल्प्य भवंतमतीव दुरापं। विलपति हसति विषीदति रोदिति चंचति मुंचति

स्वजं वच॥ राधिकाले यदर्थ विलंबितोसि तत्रैव गच्छ साधुकाहसति प्रहसति। विषीदति। पुरस्थितो पिचरणो गृहीला नानुनयाति सर्वे विषादं प्राप्नोति। पुनः कथमयं वत्राः स्यादिति रोदिति। तदुक्तं रुदितमुतमस्त्रयो मितावि ग्रहे ष्वि। चंचति चाटति भिरनुसरंतं दृष्ट्वा गच्छति। पश्चादनुनीया लिंगितानापंमुंचति। स्वविश्लथदुःखं सृजति। यद्वा रोदिति पश्चादनुनयंतं प्रणयरोषान्मुंचति निरस्करोति अत एव तापं चंचति तापं प्राप्नोति सर्व अलंकारोत्र दीपकः। वहती सारण्यउन्मादावस्था कथिता तदुक्तं व्यास प्रोदितो कंप वसुधा लवणे इति। व्यापारो योयुतेयन सउन्मादः स्मृतो यथा॥ किल किंचित मितिना स्त्र्य लक्ष्यं भाव॥ तदुक्तं रत्नाकरे कोपाक्रहर्षाभिनासादेः संकरः किलकिंचितमिति। अलंकारलक्षणं काव्यप्रकाशे॥ रेव क्रिया सुबन्धी एककारके स्यादिति दीपकः। अस्यार्थः। बन्हीषु क्रि सुकारकस्य

गीत०
५६।

गोविंद०

श्रीजयदेवेति। श्रीजयदेवेन भणितं यदि मनसा नटनीयं अभिनेतव्यं भवनया स्वादनीयमित्यर्थः। तदा इदं कामसंतं ददातीतीदं श्रीकृष्णेनादृत्याभिलाषप्रदमित्यर्थः। अतएवाधिकं कं सुखं अधिकसुखवर्तमाना हरिविरहाकुलाया बल्लवयुवतिः तस्याः या सखी दूतिका तेन प्रेषिता तस्याः वचनं पठनीयं॥ इति दूतेरष्टमप्रबंधः॥ ८॥ सा लोचिते कुत्रापि निवृतिं न लभत इत्याह। आवासेति। त्वद्विरहे सा हरिणीरूपायते मृगीरूपमिवाचरति। विश्लेषव्याधिजनितपांडुवर्णा हरिणीरूपामिवाचरति वि श्लेषआधिजनितपांडुवर्णा हरिणीरूपेणोपमीयते। तथा च यथा मृगा धूवने समंतात् सदीप्तदावाग्निज्वालोद्विग्ना व्याघ्रेण त्रासिता। अन्येव्या

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं। हरिविरहा
कुलबल्लवयुवतिसखीवचनं पठनीयं॥ ८॥ आवासो विपिनायते
प्रियसखीमालापि जालायते तापोपि श्वसितेन दावदहनज्वाला
कलापायते। सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं कं
दर्पोपि यमायते विरचयन्शार्दूलविक्रीडितं॥ १०॥ ध ६

धजाले वितते पतयती। दृष्ट्वा दिशश्च कितचकिता विलोकमाना कापि त्राणं न लभते तद्वत्। तदेवदर्शायति। आवासो मंदिरं विपिनायते अरण्यवदाचरति। प्रियः सखीपंक्तिः पिंजालायते। वियोगदुःखासहिष्णुतया प्राणमपि मोक्तुं प्रवृत्तायाः तन्निरोधकत्वात्। यद्वा तापश्यां सर्वं प्रियसखीदत्तमालापि ज्वालायते। यथा हरिणीबंधनार्थं जालं क्षिप्यते। तद्वदाचरति। तापो विरहजनितः संतापो विश्वसितेन निःश्वासेन साहायेन श्वासवायुना वनाग्निज्वालावलीवाचरति। एवं खेदमभिनयं साहा। हा कष्टं सा कथं वर्तते। यतः कंदर्पोपि शार्दूलविक्रीडितं विरचयन् कृतांतवदाचरतीति।

५६।

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवेति। श्रीजयदेवेन भणितं यदिमन सानटनीयं अभिनेतव्यं भवनया स्यादनीयमित्यर्थः। तदाह। कामस्तं ददातीति दं श्रीकृष्णेनाहं त्वाभिलाषप्रदमित्यर्थः। अतएवाधिकं कं सुखं अधिकं सुखं वर्तमानं। हरिविरहाकुलाया बल्लवयुवतिः तस्याः यासखी दूतित्वेन प्रेषिता तस्याः कचनं पठनीयं॥ तोनिद्रे अष्टमप्रबंधः॥८॥ सा लोचिनो कुत्रापि निवृतिं न लभत इत्याह। आवास इति। त्वद्विरहे सा हरिणी रूपायते मृगीरूपमिवाचरति। विश्लेषव्याधिजनितपांडुवर्णा हरिणीरूपमिवाचरतीति विश्लेषआधिजनितपांडुवर्णा हरिणीरूपेणोपमीयते। तथाच। यथा मृगी धूवने समंतात्सदीप्तं दावाग्निज्वालोद्विग्ना व्याघ्रेण त्रासिता। अगेव्या

श्रीजयदेवभणिततमिदमधिकं यदि मनसा नटनीयं हरि[illegible]विरह
कुलबल्लवयुवतिसखीवचनं पठनीयं॥८॥ आवासो विपिनायते
प्रियसखीमालापि जालायते तापोऽपि श्वसितेन दावदहनज्वाला
घनिर्दयतव बालचरित्रं बालोपि तादृशः केसमर्पणी यामनुरूपचेष्टितं बालचरित्रं कोमल
चेष्टा वा पूतनिकैव प्रथयति। विस्तारयतीत्यर्थः। स्वार्थे कः। खंडिता चेयं नायिका। तदुक्तं भर
तेन। निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रितांगः। यस्याकुतोपि गृह
मेति प्रभाते सा खंडितेति कथिता कविभिः पुराणैरिति॥७॥ श्रीराधाकृष्णो जयति श्रीजय ॥७३॥

पतिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवेति हे विबुधाः श्रीकृष्णमाधुर्यरसास्वादनपंडिताः इदं श्रीजयदेवभणितं वर्णितं र
तिवैचित्रीसंभोगरहिताया खंडितातु कलक्षणा युवतिः कांता तस्याः विलापं परिदेवनं
शृणुत आकर्णयत। कीदृशं। सुधातोपि मधुरं तत्र हेतुमाह। विबुधालयतोपि स्वर्गादपि
दुःप्रापं तत्रापि दुर्लभमित्यर्थः उक्तंचा तस्य बहेतोः प्रयतकोविदो न लभ्यते यद्भ्रमतामु
पर्यधमिति। तवकथामृतमित्यादि श्रीभागवते। अथवा। सर्वत्रात्रप्रसिद्धमिदं। नीःसी
मप्रेमरसावलंबनः श्रीव्रजराजनंदनः प्रियजनसमुदायेषु श्रीगोपिका एव तेन विबुधाः
श्रेष्ठाः वैकुंठनिवासिनः तेषामालयं वैकुंठास्थं तत्रापि दुःप्रापमित्यर्थः। तदुक्तं श्रीभागवते। ना
यं श्रीयोगे इति। यद्वांछया श्रीललनाचरत्तपइत्यादि। विबुधः पंडितो देवेति विश्वः। पक्षांतरे
रतिरनुरागः वैचित्र्यविप्रलंभास्योभावविशेषः तेन वंचिता छलिता या खंडिता न तु यस्त
न तस्या विलापमित्यर्थः। अथवा रतौ वंचिता चासौ अधरादौ खंडिता च युवति तस्याः विलापं समागादिपुष्प

श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं॥ शृणुत सुधामधुरं
विबुधा विबुधालयतोपि दुरापं॥ ८॥

लेनाधरादिखंडनेन शुष्यत्कंदनेयाहियाहीति। ततु कीदृशं। सुधातोपि मधुरं अमृतादपि
स्वादु अत एव विबुधालयतोपि दुरापमिति। तदानन्तु कामेन खिन्नास्मि याहि याहीति मा वदस्व
योगार्थमनुस्मरामीति चेदत्राह ममेच्छा नास्ति नामनुस्मरेतिराधोक्तिः ननु त्वं निजनिते
ति। नवनयनं कंदर्पानुरागं वहति कथं मां प्रतारयसीति कृष्णोक्तिः ननु तव वपुः कस्तुका
मयं श्यामत्वात् यतस्तवदशावसने अपि रूमपितनोरनुरूपेण नोतिनत्वं सर्वकाममयं प
राधायाः। अथ श्रीकृष्णस्य एवमेव भवतु नाम प्रियो यस्य वंदीयनांरतो स भैवेत्यादिति
श्रीकृष्णे कथयति सहि मया सह तवैव क्षमत आह दशानपदमिति तया मनएकं यदि
नस्यात्तदा तव पुरमेदं कथं कथमतीत्यर्थः। धूर्त पुनरपि तदेव कामयसे। अनुगतं जने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असमग्रात्स्मरज्वरदूनंनखक्षततापपीडितं॥अथानंतरंकथंवसेचेसैसछलयसीत्यर्थः॥अ
नाहूनंबहिरित्यादिनिर्दयबालचरित्रमितिपर्यंतंश्रीराधोक्तिः॥एवमन्योन्यविचि
त्रहावभावादिभिजागरमोलयोरतिरसेनाक्रांतयोःसंभोगएवनर्मादिगोष्ठीभ्अ
न्यावस्थपवामहाकविनानिरूपिता॥वक्ष्यतिच॥अधरसुधापानेकथानर्मयुभिरि
त्यादिएवंतवेदमप्यभिनपदंसंगच्छतइतिज्ञेयंतत्रप्रणयस्मरसंगेनतरंगेणोल्ल
सनेत्यर्थः॥सुरतानुरागप्रकटनेनसखीष्यलज्जासंभवातिशयेनसुकुमारांग्याःभे
पीडयाचशोकमित्यर्थः॥८॥सत्तदत्राप्रबंधः॥१७॥ ...तिश्लोकः॥कुंभकरणेन॥उ
क्तः॥सदानंदसंदोहकरंमुकुंदंनमस्कृत्यपद्मागविघूत्तयोदं॥नृपःकुंभकर्णोवियते
यिचित्रंयरंगीतगोविंदधातुंपवित्रं॥श्रीकृष्णतवास्मि

तवेदंमत्स्यस्याःप्रसरदनुरागंबहिरिवप्रियापादालक्तछुरितमरुण
च्छायहृदयोममाद्यप्रख्यातंप्रणयभरभंगेनकितवत्वदालोकःशो
कादपिकिमपिलज्जांजनयति॥५८॥

सुरतनाथतवास्मि॥तवेदमितिहेकितवधूर्तत्वदालोकस्त्वद्दर्शनंप्रख्यातःप्रसिद्धो
यत्प्रणयभरोनुरागातिशयःतस्यभंगेनकान्तोनहेतुनाशोकादपिकिमप्यनि
र्वचनीयांलज्जांजनयतिशोकेतुजनयत्स्वपरंतुशोकादपिलज्जांगुर्विसु
त्पादयतीत्यर्थः॥तथाचप्रीतोसत्यांपरमानंदजनकंत्वमीदानीत्तदभावाच्छो
कजनकत्वमेवत्वदालोकस्येतिभावः॥कीदृशमितवेदंमयुक्तंहृदयंपद्मस्यास्याः॥कीदृशंप्रियापा
दालक्तेनप्रियायाश्चरणसंबंधियालक्तेनवा॥अतएववारुणाच्छायादीप्तिर्यस्यतादृशं॥
अरुणच्छोतितिपाठेअरुणःसंध्यारागःतद्वद्योतितुशीलमस्यास्तीतिअरुणद्युतिद्युति
तादृशं॥किमिवबहिप्रसरदनुरागमिवाहृदयेपरिपूर्यधिक्याद्बहिनस्तमेवाथिपत्युर्वा॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं सर्गं समाप्ति कविः मंगलमाचरति। अंतर्मोहनेति। कंसरिपोः श्रीकृष्णस्य वंशीरवः युष्माकं श्रेयांसि कल्याणानि व्यपोहयतु। ददातु कल्याणदातृत्वसामर्थ्यकथनाय अत्र कंसरिपु पदोपादानं। किंलक्षणः। कुरंगीदृशां हरिणीतरुणीनेत्राणां अंतर्मोहि मोहनं मनो मोहः मौलिघूर्णनं तन्मादमत्तत्वं सात्विकश्चालने मिलन्मंदारस्य विस्रंसनमधःपातनं स्तंभाकर्षणं स्तंभानां मानिनीनामपि वशीकरणं। दृष्टिहर्षणं नेत्रोत्साहः श्रवणनिर्वृत्या नेत्रविकासो भवतीत्यादिकर्मसाधने महामंत्रः। पुनः किंलक्षणः। दृप्यद्भिर्दर्पयुक्तैः दानवैः दूयमानानां

अंतर्मोहनमौलिघूर्णनमिलन्मंदारविस्रंसनस्तंभाकर्षणदृष्टि
हर्षणमहामंत्रः कुरंगीदृशां दृप्यद्दानवदूयमानादिविषद्दुर्वारदुःखा
पदां भ्रंशः कंसरिपोर्व्यपोहयतु वः श्रेयांसि वंशीरवः ॥ ८ ॥ अष्टमः
सर्गः ॥ ततामथ भन्मथाखिन्नां ? अनुचिंतितहरिचरितां कलहांतरि
तामुवाच रहः सखी ॥ ५८ ॥ ४ रतिरसभिन्नांविषादसंपन्नां ॥ ८

उपतप्यमानानां दिविषदां देवानां दुर्वारा निवार्याः दुःखापदो दुःखसाधनीभूता विपत्तयस्तासां भ्रंशो नाशकः। यच्छ्रवणेन देवादेरपि पीडाभयान्मुक्तो भवतीति भावः। अनेनापि सामर्थ्यलक्षणो नायकगुणउक्तः। तथा च देवादीनां विलाससाधकोयं स्य वेणुध्वनिः किं न कर्तव्यं तस्य श्रीपुरुषोत्तमस्य विलासित्वमिति भावः ॥ ५७ ॥ ॥ श्रीजयदेवकृते गीतगोविंदस्व विलक्षणे वर्णने विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः ॥ ८ ॥ ॥ प्रणयकोपादुहरिमधिक्षिप्ते दानीं कृतपश्चात्तापां सखी आह। तामिति। अथ च आदौ मंगलार्थः ॥ आनंतर्यार्थे वा तां कलहांतरितां परुषवचनकथनानंतरं कृतपश्चात्तापां श्रीराधां रहः एकांते सखी उवाच।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथितवती। कीदृशी। मन्मथखिन्ना मन्मथेन कामेन खिन्नादुःखिता अतएव रतिरसेन भिन्ना। संगतो गतिरसेन संभोगेण भिन्ना विदारिता तेः करणां वा अतएव विषादसंपन्नां उद्वेगसहितां। अतएव वारंवारं चिंतितं। स्मितं हरेरभिरतं पुरा विलासितं तत्कालीन विनयं चाययातां। कुलहान्तरितां चेयं। नायिका। तदुक्तं भरतेन। प्राणेश्वरं प्रणयकोपभरेण सीतं यथा चाटुकारम विरादव धीर्यपश्चात्। संतप्यते मदनवह्निशिखा श्वासहस्तैर्वाष्पाकुला तु कलहान्तरितानुसा स्यादिति। इति भिन्न मन्याथ्यवचनेसंगते दारिते। स्फुटेतिश्वः। पत्तत्देव गीतेन कथयति। हरिरिति। गीतस्यास्य गुर्जरी रागः। यती तालः। गीतार्थस्त्। अयं इतिमबोधनं। हे मानिनि मानवतिमा।

हरिरभिसरति वहति मधुपवने। किमपरमधिकसुखं सखि भुवने॥१॥ माधवे मा कुरु मानिनि मानमये॥ ध्रुवपदं॥ ११ ॥

धवं श्रीकृष्णे मानं मा कुरु। अथवा। अये तिशुभावह विधो प्रियं संगमलक्षणेति याचत्। निमित्त सप्तमीयं। संभोगार्थं विलंबकरं मानं मा कुर्यात् इत्यर्थः। माधवपदेनापि माधवोपि मामेव प्रसादयस्ततो मानं मा कुर्विति। ध्वनितं ध्रुवपदं। मधुपवनेवसंतवायो वहति। हरिः श्रीकृष्णोभिसरति। स्वयमायाति। हे सखि त्रिभुवने त्रैलोक्ये अपरं श्रीकृष्णाभिसरनादन्यत्किं कृष्टं सुखं अपितु न किंचिदित्यर्थः। तवार्तिनाशायत्नणवइति हरिपदेन कथितं॥१॥ अपि च कुचकलशात्तेन घरं किं किमर्थं विफलीकुरुषे निःफलं करोषि। श्रीकृष्णकरार्पणादेव कुचकलशयोः साफल्यं ॥७५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदस्मावैवैफल्यमितिभावः। कीदृशौ। तालफलादपितालफलापेक्षयापिगुरू काठिन्यस्यो
ल्याभ्यां श्रेष्ठमित्यर्थः। अतिसरसं अतिशयेन शृंगाररससहितौ तथाचातिविमर्दनेवर्तु
लफलस्य सरसत्वं भवति तथैवचाप्यतिविमर्दनैव शृंगाररसउरूयतीति ध्वनित।
तथाचापरोपिकलशःरसोजलंतत्सहितः मंगलाय प्रियजनागमेतत्करेर्पितेजनोस्मि
न्नैवसरेत्वयाप्येवं कर्तव्यमितिभावः। २। ननु यदा हरिरागतस्तदा त्वयानकथितमित्य
तआह। कतिनेति। इदमचिरं सांप्रतमेयानुपदं स्थानं स्थानं प्रति मयाकति नकथितं
कियन्नेकथितं अपितु बहुधा कथितमित्यर्थः। किमिदं। हरिं अतिशयरूचिरं अति
शयेन मनोहरं चित्तचोरं मामरिवरमाउपेक्षस्वा। ३। एवंक्रमशः क्रमुखी प्रसाह। किंमि
ति। किमर्थं विषीदसि विखिन्नाभवसि ननु नास्मि विखिन्नेत्यत आह।

किं

तालफलादपि गुरूमतिसरसं। किंफलीकुरूषे कुचकलशं। कतिन
कथितमिदमनुपदमचिरं। मापरिहरहरिमतिशयरूचिरं ॥२॥ किं
मितिविषीदसि रोदिषि विकला। विहसति युवतिसभातव सकला। सजल
नलिनीदलशीलितशयने। हरिमवलोकय सफलय नयने ॥५॥

रोदिषीति। विकला विकलासती रोदिषि अतएव तवसकलसमस्तायुवतिसभा तरुणीपरि
षत् विहसति हास्यं करोति। तवचेष्टितं विसतीति वा। सकला चतुःषष्टिकलायुकार सपरिपा
टी कुशलेत्यर्थः। ४। तर्हि किं करोमि सत आह। सजलेति हे सजलनलिनीदलशीलितशय
ने। सजला निजलसहितानि मलिनीदलानि कमलिनी पत्राणि तैः शीलितं निर्मितं शयनं
शय्यायया तादृशे। हरिं सकलसौंदर्यादिगुणविशिष्टनायकरत्नं आवलोकय पश्य। अतएव
वनयने नेत्रे सफलय कृतार्थय। तदुक्तं अक्ष्णवतां फलमित्यादि। तथा च यदि विरहतसा च नि
र्मितसकलनलनीस्लशयनासि। तमनुगतं सस्नेहमवलोकनेन सत्कृतसकल कार्यापि भवेति भावः।

अथवानवविरहतापेन सजलनलनीदलशीलितशय्यायां हरिमवलोकयेति
कतिनकथितमित्यर्थः। सजले साद्रे सप्तमी। अस्मिन्छयनेतवानुनयार्थं विभाविष्टं हरिमु
वलोकयेति वा ॥५॥

CC0. In Public Domain, Digitizagtion by eGangotri

विचारयतीमाह। जनयसीति। मयासितैः चेगुरुखेदं महद्दुःखं किमिति जनयसि। वक्ष्यमाणं मद्वचनं शृणु। कीदृशी। अनिहिता नाकांक्षिता। मदेवेरस्यंयस्यता दृत्त्रोंयुवयोर्हितकम् अस्यार्थः॥ अथवा मया सह अनाकलितं भेदं यथा स्यादेवं मम वचनं शृणु। इयं मम सखी मनो भिन्ना मदनिष्टं मवदिष्यतीति बुध्या मद्वचनं शृणु इति भावः॥६॥ तदेवाह। हरिरिति। हरिः श्रीकृष्णः उपयातु सदंतिके। छतो बहुमधुरं अतिसरसं यथा स्यादेवं वदतु अधिकं चाटु वदति किं। एवं सति स्वीयं हृदयं अतिविधुरे किमिति करोषि॥७॥ श्रीजयदेवेति। श्रीजयदेवभणितं हरिचरितं श्रीकृष्णस्य चरितं रसिकजनभक्तिविशेषसास्वादचतुरं भक्तजनं सुखयतु आनंदयतु। किंभूतं अतिललितं शृंगाररसविशिष्टेनाति मनोहरम् इत्यर्थः। उक्तं चाष्टम रसचतुरा चेष्टा यत्र तल्ललितं विधुरेति॥८॥

जनयसि मनागधिकं मितिविधुरं खेदं। शृणु मम वचनमनिहितभेदं॥६॥
हरिरुपयातु वदतु बहुमधुरं। किमिति हृदयमतिविधुरं॥७॥ श्रीजयदेवभणितमतिललितं। सुखयतु रसिकजनं हरिचरितं॥८॥ स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये। तद्युक्तं विपरीतकारिणि तव श्रीखंडचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः॥५९॥

श्रीगीतगोविंदकाव्यं दश्याप्रबंधः॥१०॥ स्निग्धइति हि विपरीतकारिणि विपर्ययविधायिनी तिसंबोधनं। तत्तर्हि तो लक्षिपरतसर्वयुक्तमेव तया च यः परस्मिन् विपरीतमाचरति तस्य सर्वे विपरीतमेव भवति। कितत्। तव श्रीखंडचर्चा विषं चंदनानुलेपो विषवत्संतापजनको भवति। अथ च। शीतांशुश्चंद्रस्तपनः सूर्यः शीतलगावोपि तापमाचरति। हिमं तुषारोपि हुतवहो निरिव दाहको भवति। क्रीडामुदः केलिप्रमोदाः यातनाः स्वभवति। यथं तो स्निग्धे तस्मिन् प्रिये मधुरवचनैः सस्नेहे त्रकान्नायतिपरुषासि निष्ठुरभाषिण्यसि यच्च प्रणमति तस्मिं स्तंस्तब्धासि यच्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धेयमवलम्बेयितासि। यच्च तन्मुखे आलिंगनाय सन्मुखे तस्मिन् त्वं विमुखतां यातासि। प
राङ्मुखतां गतासि। यातनातीव्रवेदने समरः विरोधाले कारः। अमूदूलनिक्रीडितं कृत्तं। पञ्च
सर्गान्तिकं विमंगलमाचरति। सांद्रेति। वयं श्रीगोविंदस्य पदारविंदं चरणकमलं वंदामहे
नमस्कुर्महे। किमर्थं अमुं सकदायफक्तिप्रतिबंधकदुरितस्य नाशाय। नादयं तुमीवि
हुवचनं श्लिष्यावभिप्रायेण। दुरितं न न नसामर्थ्यं द्योतयति। स्वच्छंदमिति। किंविशिष्ट
स्वच्छंदं यथास्यादेवमकरंदवत्सुंदरं यथास्यादेवं गलंस्रावं स्रवं सा मंदाकिन्या गंगया मे
दुरं स्निग्धं तत्तथा। तथा च यस्मात् स्रुतागंगा जगत्पुनाति किं वक्तव्यं तस्य सामर्थ्यमि
मितिभावः। अरविंदे हि मकरंदो भवति तेन मंदाकिनीति ठ पमीयते दूस्काप मालंका
रः। पुनः किंभूतं। सांद्रो निबिडो आनंदो हर्षो नेपु

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलम
णिभिः संदर्शितेंदिदिरं। स्वच्छंदमकरंदसुंदरगलन्मंदाकिनी
मेदुरं श्रीगोविंदपदारविंदमशुभस्कंदाय वंदामहे ॥८०॥ १॥

रंदरादयः। इंद्रादयो दिवि सीदंतीति दिविषदो देवाश्च तेषां वृंदैः समूहै अमंदादरा
धिकादरादानम्रैः समंतात्कायादनानतियुक्तैः तैर्मुकुटेंद्रनीलमणिभिः संदर्शिताः
इंदिंदिराः भ्रमराः यस्मिंस्तत्तादृशं। अनेन नमस्करणीयत्वं कथितं। अत्र चरण
स्य कमलोपमा नंदाकिना मकरंदोपमा। सुरवृंदमौलिनीलमणीनां भृंगोपमा।
एवं पदरूपनाच्चरणस्य। तथा चात्र मंदाकिनीपदेन व्यापकत्वमागविरतप्रवा
हरूपाच्च भगवतः यशो वर्णयति ॥ ६॥ इति श्रीगीतगोविंदे कलहांतरितावर्
णने मंदमुकुंदो नाम नवमः सर्गः॥ ९॥ श्रीकृष्णो जयति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं सखीबोधितां मानिनीं लयमनुनयति। अत्रांतर इत्यादिना। अत्रांतरेऽस्मिन्नेव
वसरे प्रदोषे निशामुखे हरिः श्रीकृष्णः समुखीं सुंदराननां किंचित्कोपोपशमेन प्रस
न्नवदनामित्यर्थः। श्रीराधामुपेत्य समीपं गत्वा सानंदगद्गदपदं आनंदेन गलदक्ष
र वाक्य सहितं यथा स्यादेवं वक्ष्यमाणं उवाच। कीदृशीं मसृणरोषवशां स्निग्धकोपवशां
सखीवचनैः किंचिन्नमितरोषामित्यर्थः। पुनः किंभूतां असीमभिरपारैर्निश्वासैर्नि
सहविरहदुःखसहनाक्षमं मुखं यस्यास्तां सव्रीडसलज्जं यथा स्यात्तथेक्षितसख्यां वद

अत्रांतरे मसृणरोषवशामसीमनिःश्वासनिःसहमुखीं सुमुखी-
मुपेत्य। सव्रीडमीक्षितसखीवदनां दिनांते सानंदगद्गदपदं हरि-
रित्युवाच॥ ॥ वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दर-
तिमिरमतिघोरं स्फुरदधरसीधवे तव वदनचंद्रमा रोचयतु लोचन-
चकोरं॥१॥ प्रिये चारुशीले मुंच मयि मानमनिदानं सपदि मदना-
नलो दहति मम मानसं देहि मुखकमलमधुपानं॥ ध्रु०॥ ॥ ॥

वदसीति। गीतस्यास्य देशवराडी रागः। अष्टताली तालः। रागलक्षणं। आरक्तगमनं मु
दा घूर्णायमाननयनयुग्माढ्या। मुखगायिनि निजदयिते देशवराडी भवद्गौरीति।
लघुद्रुतौ लघुद्रुतौ लघुत्रयमष्टतालीत्यक्ता तिनिति। गीतार्थस्तु। हे प्रिये प्राणवल्लभे शीले
चे। चारु मनोहरं शीलं यस्यास्तादृशि। मयि मद्विषये अनिदानमकारणं अन्यनायि
का संभोगकारणरहितं मानं मुंच त्यज। ननु मन्नाम्ना नकृते तत्र कारणं ज्ञाते त्यत आह।
सपदीति। सपदि तन्मानसमकाल एव मदनानलः कामाग्निः मम मानसं दहति तापय ॥७७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ति॥ अतो मा सोने गस्यकाः यातो किन्तु मुखकमलमधुपानं देहि। मुखमेव पद्मकमलं तस्य संबंधि
यन्मधु तस्योन्मादिता निवामनाच पानं देहि। अनेन पानेन सं मुखेऽपत्रयसाः मुखावलोक
नं याचितं। अथवा चारुशीले मयि खलु एकनिष्ठस्वभावे तिष्ठ। अत एवाकारणमानं मुंचेत्य
र्थः। आसातां त्याचते। सपदि श्रीघ्रं मुखकमलमधुपानं मुखपद्मनिस्सृतवचनामृतपा
नं देहि। आ सादरम्प्रयणं पानमुच्यते। अतो पानं देही स्फुटं। मुखकमलमधुपानं अध
रामृतपानं वा। एकचपदं। हे प्रिये यदि किंचिद्वदसि प्रिया प्रियनिरपेक्ष्यं खल्वमापि यदसि
तदा दंतरुचि कौमुदी तव दशनानां याः दीप्तिः सैव कौमुदी चंद्रज्योत्स्ना साऽतिघोरं अति
भीमं दरतिमि

सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातं।
घटय भुजबंधनं जनय रदखंडनं येन वा भवति सुखजातं॥२॥

रं दरः साध्वसः। स एवांधकारस्तं हरति ति दुरीकरोति। अपि च। तव वदनचंद्रमा वदनं चं
द्रमा इव वक्त्रीः स्फुटदधरधरसीधवे प्रकामं मामाज्वरामृतार्थं मम लोचनचकोरं चक्षुः पक्षि
विशेषं रोचयति। तादर्थ्ये चतुर्थी। अनेन वदनचंद्रमसः तज्जिजनकत्वमिति कथितं। लोच
नयाश्चकोरत्वे तत्तदेकजीवनतया तदधीनत्वं चेति ध्वनितं॥ मृषाकरोपं प्रकटयंतीमाह।
सत्यमिति हे सुदति शोभनदंते त्वं। सत्यमेव मिथ्यार्थमेव यदि मयि कोपिन्यसि कोपनशीलासि
तदा खरास्तीक्ष्णा ये नखरास्त एव शरा बाणास्तेषां घातं प्रहारं देहि। तेनापि चेन्न तुष्यसि तदा
भुजबंधनं बाह्वोर्बंधनं घटय। तेनाप्यसंतोषश्चेत् रदखंडनं रदैर्दशनैः अधरे क्षतं जनय।
येन वा सुखजातं सुखसमूहो भवति तदेव कुरु। तथा च मम्य पराधानुरूपं दंडं विधाय कोपं
मुंचेति भावः। भ्रूणां हि सहपराधेषु जनेषु ताडनबंधनखंडनादयो दंडाः समुचिताः।
अत्र न व्याजनन खक्षता लिंगनचुंबनादीन्प्रार्थ्यते॥ २॥ नन्तु यातन प्रिया सा तव दंडं विद्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यातु किं मया अत आह। त्वमसीति त्वं मम जीवनमसि त्वयि विषण्णायां मन विषादो भवति प्रसन्नायां प्रसादः इति भव मम जीवनं मतो जीवनादन्यत् किं प्रियं भवत्स्वन त्वं न भव त्वं भवेति भावः। त्वं मम भूषणं अलंकरणमसि गौरांगी त्वां विना श्यामशरीरस्य मे केनापि भूषणेन शोभा न भवतीत्यर्थः। अनेनापि व्याजेनालिंगनं याच्यते। भवजलधौ संसारगोपजे मलजलधौ व्रजरूपे रत्नाकरे रत्नमेव मम रत्नमसि। यथान्यो रत्नाकरे प्रविश्य परिश्रांतः कश्चिद्रत्नलाभात् पूर्णो भवति तथाहं भवत्स्विन्व्रजे त्वां स्त्रीरत्नं प्राप्य कृतार्थोऽस्मीति भावः। अनेन स्वयं गोपकुलोद्भवे स्वं बहुमानयति जन्मसाफल्यमेव तावदेवं निश्चिनोति रत्नमयान्वा। समुद्रस्थानीये व्रजे व्रजांगनाः रत्नानि महारत्नं श्रीराधैवेति च ध्वनितो ज्ञातो यदुकृष्टं तद्रत्नमभिधीयते इति। उपसंहरति। भवसीति। इदं प्रबन्धे मयि भव

त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नं
भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नं। ३।
नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं कुसुमशर

इति सततं सर्वदानुरोधिनी अनुकूला भवतु। तत्र त्वदनुकूलतायां मम हृदयमेतत्करणं समुद्यतीयतं। अतिशयितं यत्नवत् दाराधनप्रयत्नयुक्तमस्तीत्यर्थः। अनुरोधानुवर्तनमित्यमरः। ३। नीलनलिनेत्यादि हे तन्वि कृशांगि। नीलनलिनस्य नीलोत्पलस्येवाभा कांतिर्यस्य एतादृशं तव लोचनं कोकनदरूपं रक्तोत्पलसौंदर्यभारं मतिं विभर्ति। यदि च कुसुमशरः कामः तस्य बाणमोचनबाणलेनेत द्वाणाभिप्रायेण गाढं कृष्णं चक्षुरनुरंजयसि रक्तं करोषि एतस्य चक्षुषोरनुरूपं योग्यं भवति। मन्मथशरमर्पितमानसानां रमणीनां नानि सलोहितानि भवंति बाणलेनचेत्तर हि सततं परमर्मभेदिनो रुधिराक्तानेत्र कामभवंति। शोकं त्वं गत्या स्तवरोमोचितं इति ध्वनितं। अथवा कुसुमशरबाणः कटाक्षः तेन नयनोभावशृंगाररसस्यानुभावः। तस्य स्नेहकटाक्षावलोकनेनेत्यर्थः। कटाक्षावलोकनालसं कृष्णं मोचयदि रंजयसि मम अनुरंजनेकरोषि एतावबाणस्य गाढमनुरंजनमनुरूपं युक्तमेव भवति भावः। श्यामे लोहितायादनसमर्था

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंभूतस्तन्मात्रीत्याह। स्फुरत्विति। मणिमंजरी हारलता कुचकुम्भयोः स्तनकलशयोरुपरि स्फुरतु चंचला
भवतु तव हृदयदेशं वक्षःप्रदेशं रंजयतु स्वरश्मिभिः शोभयतु। लक्षयन्नलिनं रक्ततां धत्ते लक्ष्यलक्ष्य
रंजय। संजातो मणिमंजर्याः पतितेन क्षोदिरं रंजयतित दानुरूपं भवतीति भावः। अत्र स्मरकेलिकर्मारं-
भे मंजरीयुक्तपूर्णकलशस्थापनं मंगलार्थं चेति सूचनाय कुचयोः कलशत्वेन मणिहारस्य मंजरी-
त्वेन रूपणं युक्तं भवेदिति कृतं। अपि च तव घनजघनमंडले भीसलजघनदेशे रशनापि क्षुद्रघंटिका-
पि रसतु शब्दायमाना भवतु। मन्मथनिदेशं कामाज्ञां घोषयतु संभोगरणे मदनाज्ञया विलासि-
नीजनान्योजयन्निति भावः। वचनचातुर्येण स्फुरतु मणिमंजरी रसतु रशनापीत्यादिना विपरीतर-
तं याचते। अपि च हे मसृणवाणि स्निग्धवचने भण आज्ञापय यानव चरणद्वयं सरसः सांद्रः स-
हरसेन शृंगारेण सहवर्तत इति वा सरसं यथा स्याद्देवं लसन् शोभायमानो ऽलक्तकरागो यत्र तादृ-
शं करवाणि कुर्यां त्वं चरणद्वयं स्थलकमलगंजनं स्थलोत्सन्नं यत्कमलं स्थलकमलं तस्य तिरस्कारकं

स्फुरतु कुचकुम्भयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं। रसतु रशनापि तव घनज-
घनमंडले घोषयतु मन्मथनिदेशं। स्थलकमलगंजनं मम हृदयरंजनं जनि-
तरतिरंगपरभागं। भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागं।८

अरुणतया सौगन्ध्यसौकुमार्येण तिरस्कृतस्थलकमलसौन्दर्यमित्यर्थः। अनेन स्वचरणस्य स्वादपि हि-
तत्वं कथितं तत्तहृदयानुरंजनत्वात्। पुनः कीदृशं मम हृदयरंजनं मद्धृदयमानुरागजनकं। अथवा मम
हृदयमपि कौचबंधादौ रंजयति। संभोगेह स्खलितालक्तकरागयुक्तं करोतीति तथाभूतं। अतो मया
स्वरंजनमुचितमिति भावः। पुनः कीदृशं जनितउत्पादितो रतिरंगे सुरतकौतूहले संभोगराग-
स्य चापरिभागः परस्परशोभा येन तादृशं। कामोद्रेककारीत्यर्थः। तथा च कौचबंधादौ मम हृदयलं-
गमोरिति धरणिः। स्मरेत्यादि। हे प्रिये उदारं सुंदरं पदपल्लवं चरणकिसलयं मम शिरसि धेहि। मम
मस्तके स्थापय। अनेन प्रियजनचरणस्य सगर्वतत्तोरवातिशये नोपालंभमुच्यते। पल्लवपदेन सौ-
कुमार्यसौगन्ध्यं तापहारित्वं मार्गत्वसौंदर्यं चेति। उदारं महत्। अभीष्टप्रदं वा तेन सेवने सेवया
न्यासमिति। कीदृशं। मम मंडनमलंकरणं। अनेन भगवतः प्रियजनानुवर्तनमेव भूषणमिति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथितं पुनः कीदृशं। स्मरस्य यद्गरलं विषं तस्य खंडनं नाशनं। विरहिमूर्द्धपदत्वेन मलयानि
लोदः स्मरगरलस्य निरूपणात्। स्मरस्य सर्पत्वमाक्षिप्यते। चरणपल्लवे धेहि। सेमेन नायिका
याः गरडतंड स्याक्षेमकमिदं। परमपि सर्पादि विषं गारुडिकचरणाभिमंत्रित पल्लवाघ्यारोप
णेन च शाम्यतीति ध्वनितं। किंच। मपि दारुणो दुःसहं मदनः कामः तज्जनितं यत्कदनं तापः
स एवारुणः सूर्यं ज्वलति। अतस्तेन उपहित विकारं ग्लान्यादिरूपं हरतु दूरीकरोतु। अन्योपि
सूर्यसंतापः त्रिर सिपल्लव दिस्थापनेन शाम्यतीति ध्वनितं। अरुणः स्फुटरागे स्यात् सूर्यसूर
स्य सारथावपीति। कदनं कलुषेताप्स्वनि। ७। इतीति। इत्यनेन प्रकारेण मुरवैरिणः श्रीकृष्णस्य
राधिकामधि राधां लक्ष्मीकृत्य प्रोक्तं वचनजातं वाक्यसमूहो जयति। सर्वोत्कर्षेण वर्तते। कीदृशं

स्मरगरलखंडनं मम शिरसि मंडनं। देहि पदपल्लवमुदारं। ज्वलति मयि दारुणो मदन
कदनानलो हरतु तदुपाहितविकारं। ७। इति चटुल चाटुपटु चारु मुरवैरिणो
राधिकामधिवचनजातं। जयति पद्मावतीरमण जयदेव कविभारती भणितमति शातं। ८।

हरं चाटुमीति युक्तं पटु चतुरं चारु सुकुमारं। पुनः कीदृशं जयदेवनाम्नः कवेः भारतीति संज्ञाय
स्याः एवं भूत्याया वाणी भूषिता अलंकृता येन तत्तथा मानिजनेति। मानिनीजनस्य मान
वती लोकस्य जनितं शांतं सत्स्वयेन तत्तथा। पाठांतरे। पद्मावतीजयदेवस्य पत्नी तस्या रम
णो वल्लभो यो जयदेवकविः तेन भारत्याः भारतीसंज्ञस्याः कविर्वर्णितिः पुनः कीदृशं अतिश
यितसुखं यस्मात्तत्तादृशं। भारत्या वाण्या भणितमितितु भारत्यानं मंदं। न्यासतिपौन
रुक्त्यापत्तेः प्रथमपाठस्तु समीचीन एव। तदुक्तं सारे शिवसुधाकरे शृंगारादिषु सर्व
तीच भवेदितिर्यदिहास्याद्भुतास्वयेति। चटुलः सुंदरे चलेति धरणिः। चटुल चाटुप्रिय
वाक्यमितिहस्चंद्रः। पटुस्तीक्ष्णो निरोगे च तुरेन्यवदीति विश्वः। ८। मेशांतसुखानि
चसमरः। ८। ॥ इति श्री गीतगोविंदे तेनविशाप्रबंधः॥ १९॥ ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीमात्मानं निरपराधं ज्ञापयन् संभोगार्थं प्रोत्साहयन्नाह परिहरेति। हे कृतातंके विहि
तकोपे। श्रीराधे शंकां मम मान्यकामिनीसंभोगजातां इति संज्ञायं परिहर त्यज। यतो ममस्वां
ते चित्ते अंतरमध्यं ततरं वितनोरतनुश्च्यूता कामादन्योजनो तादृशो भाग्ययुक्तः स्त्रीलक्षणान्
कोपि न विशति न प्रविशति। कुतो न विशति तत्राह परेति परानवकाशिनि इतरावकाशशू
न्ये तत्र हेतुमाह। त्वयेति घनं निबिडे स्तनजघने यस्याः तादृशा त्वया सततं निरंतरमाक्रांते व्या
प्ते। तथा च सदा त्वया पूरिते मदीये हृदये अन्यस्य प्रवेशस्थलमेव नास्ति। सांगस्य प्रवेशाभाव
दनंग एव प्रविशति न स्त्रीगाभावादित्यर्थः। हे प्रणयि

परिहर कृतातंके शंकां त्वया सततं घनस्तनजघनयाक्रांते स्वांते परानव
काशिनि। विशति वितनोरन्यो धन्यो न कोपि ममांतरं स्तनभरपरी रंभा
रंभे विधेहि विधेयतां॥ मुग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबं
धनिबिडस्तनपीडनानि। चंडि त्वमेव मुदमंच न पंचबाणचांडालकांडदलना

नितक्षान्तरीरंभारंभेआलिंगनारंभे विधेयतां कर्तव्यतां विधेहि कुर्वित्यर्थः। अतंकः कोपस्तत्
योरीति परणिः। इत्थं यद्यवं न प्रसेषितदा मय्यपराधानुकूलं दंडं आचरेत्याह। मुग्धेइति।
हे मुग्धे सुंदरि मूढे वा। निर्दयं दयारहितं दंतदंशं दंतक्षतं अथ च दोर्वल्लिबंधनं निबिडगा
ढस्तनाभ्यां अपीडनं च विधेहि कुर्वित्यर्थः। हे चंडि अतिकोपनेत्वमेव मुदं अपराधिनो मम
दंडाचरणेन आनंदं अंच प्राप्नुहि। न पुनः पंचबाणः कामः स एव निरपराधिजनहिंसक
त्वेन चांडालः तस्य कांडदलनात् नाराचप्रहरणात् असवः प्राणा प्रयांतु निर्गच्छंतु। चांडा
लप्रहारेण समीचीना गतिर्न त्वया साक्षाद्देवयथोचितदंडाचरणं विधेयमिति भावः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीमात्मानं निरपराधं ज्ञापयन् संभोगार्थी प्रोत्साहयन्नाह। परिहरेति। हे रुषा तं कोपं विहि
तकोपा श्रीराधे त्वं त्वं काममान्यकामिनीसंभोगजातं इति सखं यं परिहर त्यज। यतो मम स्वां
तं चित्ते अनरमभ्यंतरं वितनोस्तनुश्रूना कामादन्यो जनो नाहं त्वां भाग्ययुक्तः सील क्षयाः
कोपि न विशति न प्रविशति। कुतो न विशतीत्याह। परेति। परा नवकाशि निहतराव कान्तास्थ
न्यो तत्र हेतुमाह। त्वयेति घननिबिडस्तनजघनं यस्यास्तादृशा त्वया सततं निरन्तरं कांते व्या
प्तो नत्वापूर्वा सदा त्वया पूरिते मदीये हृदये ऽन्यस्य प्रवेश स्थलमेव नास्ति। सांगस्य प्रवेशाभावा
दनंग एव प्रविशति तस्यांगाभावादित्यर्थः। हे अपापि

परिहर कृतातंके शंकां त्वया सततं घनस्तनजघनयाक्रांते स्वांते परानव
काशिनि। विशति वितनोरन्यो धन्यो न कोपि ममांतरं प्रणयिनि परीरंभा
रंभनिभाते विधेयतां। हे मुग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबं
धनिबिडस्तनपीडनानि। चंडि स्वमेव मुदं पंचबाणचांडालकांडदलना

नितस्मात् परीरंभारंभे आलिंगनारंभे विधेयतां कर्तव्यतां विधेहि कुर्वित्यर्थः। आतंकः कोपशाक
यो रिति धरणि। हे आयचवंन प्रेषितदासमप्यपराधानुकूलं दंडं आचरेत्याह। मुग्धे इति।
हे मुग्धे सुंदरि मूढेवा निर्दयं दयारहितं दंतदंशं दंतक्षतं अथच दोर्वल्लिबंधनं निबिडगा
ढस्तनाभ्यां अपीडनं च विधेहि कुर्वित्यर्थः। हे चंडि अतिकोपने त्वमेव मुदं अपराधिनो मम
दंडाचरणेन आनंदं च प्राप्नुहि। न पुनः पंचबाणः कामः स एव निरपराधिजनहिंसक
त्वेन चांडालः तस्य कांडदलनात्। नाराचमहरणात्। असवः प्राणाः प्रयांतु निर्गच्छतु। चांडा
लप्रहारेण समीचीना गतिरंन त्वया साक्षादेव यथोचितदंडाचरणं विधेयमिति भावः।

Dr. Urmila Sharma Collection, Varanasi

नयात्वकामपीडया आनंदेत्यामावस्थया। निकांतरं संभोगरूपं प्रसादमानवस्याः सकाशा
त्प्राप्नुतेति ध्वनितं। चंडी स्यादतिकोपने त्यमरः॥१४॥ ननु कोपो नास्त्येवेत्याह हे शशिमु
खीत्यादि। हे शशिमुखि चंद्राननेऽतव भंगुरा कुटिला भ्रूः भाति शोभते। कीदृशी। युवज
नानां तरुणजनानां मोहाय संमोहनाय कराला भीषणा कालसर्पी कृष्णाहिवधूः। अन्या
भुजंगी दष्टा मोहयति अतो दृष्टमात्रा एवेत्यतस्याः करालत्वं। तदुदितभयभंजनाय तस्या
उदितं यद्भयं तस्य नाशाय यूनां तरुणानां मल्लक्षणस्य यूनः इत्यर्थः। त्वदधरसीधुसुधै

शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहकरालकालसर्पी तदुदितभय
भंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्रः॥१५॥ व्यथयति वृथा
मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः। सुमुखि विमु
खीभावं तावद्विमुंच न मुंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोऽयमुपस्थितः॥१६॥

व त्वदीयायाऽधरसीधुमदिराविशेषः स एव सुधामृतं स एव सिद्धः साधितः मंत्रः। त्वमेवेदध
रामृतं पायय सितदा परं तद्विषापहरणं भवेदन्यथा मस्यादेवा। अतो धरपानं देहि नच कोपसर्प
दष्टस्य मम जीवनं संपादयेति भावः॥१५॥ एवमप्युत्तरमप्रयच्छन्तीं प्रत्याह। व्यथयतीत्यादि।
हे तन्वि कृशांगि तव मौनं निःप्रयोजनवचनेन कोपमौनं व्यथयति पीडयति। कृशांग्याः
तव एतावत्कोपधारणमनुचितमिति सूचनाय तन्वीपदोपादानं तस्मात्पंचमं रागविशे
षं प्रपंचय विस्तारय हे तरुणि मधुरालापैर्माधुर्यविशिष्टसुरतालापैर्मधुरैर्वचनैर्वा तापं म
मसंतापं विनोदाय प्रसारय। हे सुमुखि शोभनवदने दृष्टिभिः कटाक्षावलोकैर्विमुखीभा
वमौदास्यं विमुंच सुमुख्या या असमुखमनुचितमिति भावः। हे मुग्धे अयं प्रियजनः स्वयमे
वानाहूत एवोपस्थितः आगतः। कीदृशः। अतिशयेन स्नेहवान्। अतो मानं मुंच यमागतः
प्रियः हतुं नोचितं इति भावः॥१६॥ संप्रति मानापनोदाय तदंगस्तुतिं करोति। बंधूकेत्यु

CC0. In Public Domain, Digitizagtion by eGangotri

हेचंडितेप्रियेअयंतवाधरोबंधूकद्युतिबांधवः बंधूकस्यारुणः पुष्पविशेषस्य याद्युतिदीप्तिः
तस्याः बांधवः सुहृत्पोषकत्वसंबंधः जनेन बंधुकादिभिः श्रेष्ठत्वंउच्यते। अयंच स्निग्धो गल्लः
कपोलः मधुकच्छविमेदिरद्वजनितपांडितेमयाम धूकपुष्पस्येवछविः कांतियस्य एतादृशः
श्रकास्ति नो भाति। ते लोचन नीलिनश्रीमांस्वनरत्नकांत्या निलोत्पलस्य कांतिं मोचयति साजयं
तितादृशो स्वभावत एव नील तारकस्य नीलं चक्षुरंजनेन विनापि सुतरां नीलोत्पलादप्यति
शोतेति भवः। हे कुंदाभदति कुंदस्येवाभायेषां तादृशाः दंतायस्याः तादृशी तव नासाति
लप्रसूनस्य पदवीं तिलपुष्पप्रसिद्धिं अभ्यति प्राप्नोति मस्यतीति पाठे गति क्राम

[illegible]
नालेनालेन [illegible]
[illegible]

तीसर्वथा। प्रायः इति तर्कयामि। सः प्रसिद्धः पुष्पायुधः पुष्पमेवायुधं शस्त्रं यस्य तादृशाः
कामः त्वन्मुखसेवया विश्वं जगद्विजयते। कामः पंचभिर्बाणैः विश्वं विजयते त्वन्मुख
बंधूकमधुनीलोत्पलतिलकुंदपुष्पाणि संतीति त्वन्मुखादेव प्राप्तायुधः कामो विश्वं
जयतीति भावः। तथा च रक्तबीजनालकषायोज्वलेति अकर्षणवशीकरणोन्मादन
द्रावणः शोषणेति कामस्य शराः कथिताः। त्वन्मुखसेनयेति पाठे त्वन्मुखमेव सेना
कटकं तेन। बंधूको बंधुजीवस्यादिति विश्वः। मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुम
इति हारावलिः। ६६। श्रीराधाधरामृतपानलुब्धमिलिंदायनमनः तादृशी विति।
हे तन्वि त्वं पृथ्वीगतासि पृथिव्यां प्राप्तासती विबुधयौवनं देवयुवतीनां समूहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हो अश्चर्यं वहसि धारयसि एकैकेनैवांगेन देवांगनानां सौंदर्यं तिरस्करोषीत्यर्थः। तदेव
हृदयति। तवदृशौ नेत्रे मदालसे मदेन हर्षेणालसे मंथरे। तथा च स्वर्गे एका च मदाल
सा नाम्नी देवांगना। त्वं तु नेत्रे एवं विधे मदालसे दधासीत्याश्चर्यमिति भावः। तव वदनं इंदुम
त्या स्पदं इंदु विषयिणी या मतिस्तस्या आस्पदं विषय इत्यर्थः। तव मुखे अयमिंदुरिति म
तिर्भवति। तथा च इंदुमती देवांगना तस्याः सौंदर्यादप्यधिकं शोभां मुखे मेव वहसी
ति श्लेषेण लभ्यते। तव गतिः गमनं जनमनोरमं लोकानां मनोहारिणी। अथवा
जनस्य मल्लक्षणस्य जनस्येति। तथा च मनोरमा नाम्नी देवांगना

दृशौ तव मदालसे वदनमिंदुमत्याश्रयदा तज्जनमनोरमा विधुतरं
भमूरुद्वयं। रतिस्तवकलावती रुचिरचित्रलेखे भ्रुवा वहो विबुधयौ
वतं वहसि तन्वि पृथ्वीगता॥ ८५॥

तदात्मिका। अथवा रमा लक्ष्मीस्तदात्मिका। लक्ष्म्याः सौंदर्यादिकं तव गमनं तत्तुल्यं वर्तत
इत्यर्थः। तवोरुद्वयं ऊरुयुग्मं विधुतरंभं विधुता स्वशोभया तिरस्कृता रंभा कदली
येन तादृशं। तथा च ऊरुसौंदर्येण तिरस्कृता रंभा नाम्नी देवांगनापि। अथ च तव रतिः सुरत
क्रीडा कलावती कामकलाकौशलकारिणी। हावभावकिलकिंचितमोट्टायितबिब्बोकादि
मनी सर्था। तथा च संभोगकौशलेन यालंकृता कलावती नाम देवांगनेति भावः। भ्रुवौ रुचित
चित्रलेखे निर्मितविचित्रलेखे च रुचिरपाठ मनोहरे इत्यर्थः। तथा च स्वर्गे एका चित्रलेखा अ
त्र तु च द्वयोः चित्रलेखाद्वयं रचितमित्याश्चर्यमिति भावः। प्रेयो नामायमलंकारः। तदुक्तं
दंडिना। प्रेयः प्रियतराख्यानं रसवद्रसपेशलमिति। पृथ्वीछंद इत्युपध्वनितं। तथा श्लो
कद्वयेन गुणकीर्तनेन मानवश्याः प्रसादनेऽकथितं। इ.... कविः सर्गांते आशिषं प्रयुंक्ते। ॥८५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रीतिमिति। हरिः श्रीकृष्णः वः युष्माकं गायतां शृण्वतां प्रीतिमानंदं तनुतां विस्तारयतु। भक्तानां क्लेशान् हरतीति हरिः। किंलक्षणः रणे संग्रामे राधायाः पीनौ पयोधरौ तयोः स्मरणकृतुसं स्कारो यो धायाः पीनौ तौ तादृशौ कुंभौ यस्य तथाविधेन कुवलयापीडेन हस्तिना सार्द्धं संभेद वान् संसर्गवान्। अत्र प्रचुरशृंगारित्वं तथा च श्रीराधायाः सर्वाधिकभावो तथा च श्रीकृष्णस्या द्भुतवीर्यं शृंगार विरोधि भयानकहेतु महासत्वहस्तिसंग्रामे शृंगाररसस्याविर्भावेन वर्णि तौ मितिज्ञेयं। तदेवाह। यत्र यस्मिन् रणे तत्कुंभस्थलदर्शनेन बोधात् सात्विकविकारेण स्विद्यति स्वेदं करोति पुनः केनापि सुखोदयेन क्षणं मीलति ईक्षणनिमीलति सति। अथ अथानंत रं तत्क्षणमेव द्वियेक्षिप्ते हते सति कंसस्याल मनिन्याप्येन जितं जितयावेगे

श्रीतिमतनुतां हारः कुवलयापीडेन सार्धं रणे राधापीनपयोधरस्मरणकृ-
त्कुंभेन संभेदवान्यत्र स्विद्यति मीलति क्षणमभि क्षिप्ते तदीये
तदा कंसस्यालमभूज्जितं जितमिति व्यामोहकोलाहलः ॥८॥

न द्विरुक्तिः इति व्यामोह कोलाहलः अभूत्। अथ मर्थः। जितं तावत्प्रथमं कंससभायामानंदो जा तः। पश्चात्सक्षणमेव हंतद्वीपे अवेगा छत्रणा जितमिति अमुकनामप्रकारेण व्यामोहः मूर्छा लोकाहलः हाहाकार शब्द अभवदित्यर्थः। यद्वा उदित सात्विकविकारे नादत्रास्यदर्शनात् व्यामो हात् अक्रोस्या जितमिति कोलाहलः अभवदित्यर्थः ॥८॥ ॥इति श्रीगीतगोविंदे मानिनी वर्णनं मुग्धभावानाम दशमः सर्गः ॥१०॥ ॥ द्वादशमे मानप्रकारमनु वर्णयदानीमेकादशे सान्मानीतायामानिन्या अभिसारमाह। सुचिरेत्यादिना। कापि कंदर्पिनीयस्त्राभिधा सखी श्री राधां जगाद च भाषे का सन्निप्रदोषे स्फुरति सति। कीदृशे दृष्टिमोषे दृष्टिं मुष्णाति चोरयति स्वविषय ग्रहणसामर्थ्यं करोतीति तादृशे रसो अंधकारे गाढांधकारे इत्यर्थः। पुनः कसति। केनावगृगा

Dr. Urmila Sharma Collection, Varanasi

गीत०
। ग्ध्या

कोहरणमयनां श्री राधां। सुचिरं बहुकालं व्याप्यानुनयन्नुनीणत्सा प्रसादयित्वा कुंजय्या ल तो धावेष्टितं कुटिराभ्यन्तरस्थायनीयं गतवति। सुचिर मिसादिं नातस्यां स्नेहा चिक्ये न तद्द्रयता कस्थितेति ध्वनितं। राधानुनयएव मम परम पुरुषार्थ इति ज्ञापनाय सुचिरं पदोपादानं। कीदृशौ केशवे। कृतवेशौ। कृता भिसारोचिता लकरेण। अथवा। निर्मितं श्रीराधामंडनार्थे विविध पुष्पादिना लंकरणादिकं येन तादृशे। कीदृशीं राधां। रुचिता रुचिरा मनोहरा भूषालंकृतिर्यया तादृशीं। पुनः कीदृशीं। निरच सादां। निर्मतोऽवसादा श्री कृष्णानाम मसजं दुःखं यस्यास्तां। श्री कृष्णानुनयात्तु विगतखेदामि

[illegible] मनुनयेन क्षीणरत्ना मृगाक्षी गतवति कृतवेशे केशवे कुंजशय्यां।
[illegible] तदा [illegible] भूषांदृष्टि भाव प्रदोषे कृतानिरव सादा कापि राधां जगाद॥ ६९॥
अनंतरं लोक चतुष्टयं [illegible] ने तर नगि [illegible]
मामाद्रक्ष्यति वक्ष्यति स्मर कथां प्रत्यंग मालिंगनैः प्रीतिं यास्यति रंस्यते सखि [illegible]
तिसंचिंतयती [illegible] वेपते पुलक [illegible] नंद [illegible] सहत्र ति मूर्छति। स्थि

रार्थः। ६८। पुनरपि तस्यो त्कंठाधिक्यं कथयंती वर्णयंति। स्वेत्यादि। हे सखि सा राधा आगत्य मां द्रक्ष्यति द्रक्ष्यति। दृष्ट्वापि मां स्मरकथां स्मरक्षोभेण सचलित मधुरवक्रोक्तिकं दर्पकलिसूचिकां कामकथां वक्ष्यति। कथयिष्यति स्मरालापं कृत्वा सा प्रत्यंग प्रत्यवयवं ममालिंगनैः प्रीतिं यास्यति। प्रीतियुक्तापि मया सह रंस्यते केलिं करिष्यति इति चिंताकुलः स श्रीकृष्णः। स्थिरः तमः पुंजे स्थिरांधकार समूहे तां पश्यति। समागत्य सा ध्वसे न वेपते पुलकयति अंगानी ति। अथवा। तत्वालिंगनं विभाव्य स्वतः सुखेन रोमांचयुक्तो भवती सर्थः। आनंदयति संभोग क्रीडामनुकल्प्या नंदयुक्तो भवतीसर्थः। तेनैव संभोगश्रमेण खिद्यति स्वेदयुक्तो भवति पश्चात्सुरतांते न पुनरपि सतृष्णं दृष्ट्वा अभिलषति गच्छतीप्रस्लो गच्छति। प्रसस्थाने

स्थिरतमः पुंजे निकुंजे प्रियः॥ ७०॥
गीगो० २०
कश्चान्नागला चामृदृशामुक्तं स्मृत्वा ... प्रकोतिकस्ख्या वा सुप्रियतम
[illegible] पश्यापायाप्र... व्यानंकरो

गच्छ्य॥

CC0. In Public Domain, Digitizagtion by eGangotri

श्री

तिरश्चीनेननिर्वर्तिताभूत्साकंपपुलकस्वेदसात्विकविकारान्प्रकटयतीसर्थः।साक्षात्समागमेकी
दृशोरसोदयोभविष्यतीतिकेनवक्तुंशक्यतेऽतीवप्रगल्भमितिभावः।प्रसंगमालिंगनेनच
साधिरूढमालिंगमुक्तं।।शार्दूलविक्रीडितंछंदः।दीपकालंकारः।७०।।श्रीकृष्णस्यप्रेमानुच
र्येदानीमभिसारोचितनिविडांधकारस्योद्दीपनत्वमनुवर्णयंतीपुनर्रेपिलरयति।अक्ष्णो
रित्यादि।हेसखिध्वांतंअंधकारः।निकुंजेलतामंडपेप्रसकृत्सर्वतः।सुदृशांसुंदरनयनानांक
तीनांपरवंचकानां।अभिसारसत्वरहृदांअभिसारेसत्वरंतीव्रंहृत्मानसंपरमविदग्धवि
लासिनीनामिसर्थः।तासांप्रसंगंप्रत्यक्षयचमालिंगतिहर्लस्यति।किंकुर्वन्।अक्ष्णोर्नय
नयोः।अंजनंकज्जलंनिक्षिपितु।श्रवणयोःतापिच्छगुच्छावलीतमालस्यस्तबकपरंपरांनि
क्षिपितु।मूर्ध्निमस्तकेश्यामसरोजदामनी

अक्ष्णोर्निक्षिपदंजनंश्रवणयोस्तापिच्छगुच्छावलीं मूर्ध्निश्याम सरोज
दाम कुचयोः कस्तूरिकापत्रकं।धूर्तानामभिसार सत्वरहृदां विष्वक
निकुंजे सखिध्वांतंनीलनिचोलचारुसुदृशांप्रत्यंगमालिंगति।।७१।।

नीलकमलमालांनिक्षिपतु।कुचयोःस्तनयोःकस्तूरिकापत्रकंमृगमदचित्ररचनांनिक्षि
पतु।कीदृशंध्वांतं।नीलनिचोलंचारुप्रच्छदवत्सुंदरं।अभिसारोचितवरप्रभूषणादिकंस
र्वंध्वांतमेवकरोतीसर्थः।अतोभूषादिनिर्माणेनायिकालातिक्रमोनयुक्तइतिभावः।शा
र्दूलवृत्तं।तथाच।स्त्रीणांमलंकारोदित्वनाधिकारोनपुंसकादानामेवेतिनपुंसकनिर्दे
शेनध्वनितं।अपिच।श्यामसुंदरेणैवसर्वभूषादिकंसंपादनीयमिसलंमंडनविलंबेनेति
तस्मादृशात्ध्वनितेधूर्तःस्यादेकेलोकेच।।७१।।किंचप्रावादनीनांप्रेमदीक्षाकारणमप्येतदि
त्याह।काश्मिरेत्यादि।काश्मीरवत्कुंकुमवत्।गौरंवपुःशरीरं यासांमीदृशीनामभिसारिकाणाम
भिसारपराणांनायिकायिकानांअभितःसर्वतःरुचिमंजरीभिःकांतिपरंपराभिःआबद्धेरचे
येनतादृशं।एततमालदलनीलंतमं।तमालदलवत्पल्लवदलवदतिश्यामेननीलंतमिस्रंतमः

Dr. Urmila Sharma Collection, Varanasi

गीत०
॥८२॥

गोविंद०

तस्मेहेमनिकषोपलतां। तासां अभिसारिकाणां हेमनदेव हेमस्वर्णं तस्य निकषोपलतां क
षकैणपाषाणतां तनोति विस्तारयति। परकांतिमतीनां एतादृश्यपि गाढांधकारे सर्व
मुपेक्ष्य कांताभिसारप्रस्थाने नप्रेम्णः शुद्धिः परीक्ष्यतेति भावः॥७३॥ परमविदग्धा सा
वीररसोद्बोधकवाक्यदंदैः संकेतनिकुंजसमीपमानाय लज्जावतीं पुनरपि निकुंजप्र
वेशायादिशत्॥ हारावलीत्यादि॥ अथ अथानंतरं इयं सखी सखीं श्रीराधां इति वक्ष्य
माणमुवाच। कीदृशीं निकुंजनिलयस्य निकुंजएव निलयो निभृतगृहं तस्य द्वारे हरिं
श्रीकृष्णं निरीक्ष्य दृष्ट्वा व्रीडावतीं लज्जायुक्तां प्रथमसमागमे कामिनीनां लज्जा।

काश्मिरगौरवपुषामभिसारिकाणामाबद्धरेखमभितोरुचि
मंजरीभिः। एततमालदलनीलतमंतमिस्रंतत्प्रेमहेमनिकषो
पलतांतनोति॥७॥ हारावलीतरलकांचनकांचिदाममंजीर
कंकणमणिद्युतिदीपितस्य। द्वारे निकुंजनिलयस्य हरिंनि
रीक्ष्य व्रीडावतीमथसखीमियमित्युवाच॥७३॥ ॥१॥

भवतीति लज्जावतीमुक्तां। कीदृशस्य निकुंजनिलयस्य हारावल्यो हारपंक्तयः तरलो
मध्यमणिः कांचनकांचिदाम स्वर्णखचितमेखलादाम मंजीरो नूपुरः कंकणं करभू
षणमेतेषु खचिता ये मणयस्तेषां द्युत्या दीपितस्य प्रकाशितस्य। तरलश्चंचले चले
खंडे हारमध्यमणावपीति विश्वः। निलयश्चागारं मंदिरमित्यमरकोशः॥७३॥ तदेव गी
तेन कथयति। विरचितेति। गीतस्यास्य वसंतरागो यती ताले स्तल्लक्षणं कथितं प्रा
क्। गीतार्थस्तु हे मुग्धे सुंदरि अनुगतमधुमथनानुसरणकृतविलंबादनमिति ॥८२॥

CC0. In Public Domain, Digitizagtion by eGangotri

हे राधिके रूपेणाधिके रूपेणाधिका सकलव्रजांगनातिशायिन सौंदर्येण मोहितव्रजेंद्रनंद
न। अथवा। स्वमाधुर्य वंशिण्या पंचमादि स्वरेण वा वशीकृत कृष्णा वर्णितं च भगवत्प्रिय।
कृष्णसारहरं पंचमस्वरे मुंचगीतं कुतका निराधिके। प्रक्षते त्र हरिणानुधावताल्लां नयावद
तिभीषणे जनदृतार खलु त्वं देहरूपे च से काह्वार मधुमथनं मधुमधुराव्यर सकलं मन्मथाति
विलोडयति ततथा। तं शृंगाररसस्वादचतुरमिसर्थः। अथवा। मधुमथनं भ्रमरवत्।
द्रसास्वादलंपटं तं। अथवा। मधुयसंतंत स्तं मध्नाति दृश्येमयति सः स्मरः तकंदर्पकोटि
सुंदरं अनुसराभिनुगच्छ। कीदृशं। अनुगतं तव सौदर्यलावण्यादिना

विनिर्गतचाटुवचनरचनं चरणरचितमणिपातं। संप्रति मंजुलवंजु
लसीम नी केलिशायनं मनुयातं॥१॥ मुग्धे मधुमथनमनुसर राधि

के। अनुकूले न त्वां अनुसृतस्तं। अथवा। कामेनाधिकद्युति राधिके शृंगारस्वभाव इत्यर्थः
रस्तु कामद्वे सेकाक्षर मधुवसतं। अथवा। कास्वन संवतो भावेन त्वद् श्री भूत्वानुगतं सं
केतनस्थानं प्रियं अनुसर। क्रीडा भवेत्यर्थः। वसंतस्योद्दीपनविभावात्। अथवा। हे राधि
केऽनुसार न त्वनाहूता कथं व्रजामीति चेदत आह। मधुना माधिदूषको यं समागतस्तेन म
न्मथान सरे इत्यर्थः। धुवपदं। अनुगतस्त्वमेवाह। विरचिता विहिता चाटुप्रिया किं। मम प्राण
कोटिवल्लभा त्वमेवासि। प्रसादनरबश्नो मया पिर्व्रजसुंदरी कदंबमपि न तुलयामि। इत्यादि
वचनकदंबस्य रचना संदर्भो येन तादृशं। पुनः कीदृशं। तव चरणारविंदे रचितः प्राणिपा
तो चनति येन तादृशं। अथवा तवा नयनाम मकरंणेर चितः फणिपातो यन तादृशं च
रणे संकेतार्थाभिमुखगमनार्थमिति वा। विविधानुनयपूर्वकं न मस्क्रिया कथना मरचितपदौ पादानां तर्हि संप्रति कुत्रास्तत आह।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संप्रतीति। संप्रत्यधुना मंजुलो मनोहरो यो वंजुलो वेतसः तस्य सीमनि पर्यंते व्यक्तो कलति कान्तटे निपावतु। यत्केलिशायनं क्रीडाशय्या तामनुलक्षीकृत्य यातं गतं तत्रस्थः त्वां प्रतीक्षत इत्यर्थः। वंजुलादीनामुद्दीपनत्वविभावत्वेन परिगणनात् तां प्रोत्साहयंती त्वरयति॥१॥ घनेत्यादि हे सखि उपेहि श्रीकृष्णमुपगच्छ। कथं यथा स्यात्। एवं पुनः कथं यथा स्यात्। दरेण साध्वसेन मंथरश्चरणे विहारः पदविन्यासो यत्र। एवं यथा स्यात्। तत्र हेतुगर्भविशेषणेन संबाधयति घनयोर्निबिडयोर्जघनस्तनयोर्भार स्य भरो तिशयो यस्यास्तत्संबुद्धौ मरालानां हंसानां स्वकीयमंथरागमनेन मंजीरादिशब्देन च निकारं तिरस्कारं विधेहि कुरु। संप्रति मरालेषु श्लाघ्यमानेषु सत्सु मंजीरादिध्वनिरपि मरालश्लाघ्यः

घनजघनस्तनभारभरे दरमंथरचरणविहारं। मुखरितमणिमंजीर मुपैहि विधेहि मरालनिकारं॥ श्रृणु रमणीयतरं तरुणीजनमोहन मधुरिपुरावं। कुसुमशरासनशासनवंदिनि पिकनिकरे भज भावं॥

त्वं एव च लकैः प्राप्नुहि। संप्रति यो यो भिसा क्षण इति ध्वनितं। अथ च हंसशब्दो यात्रायां शुभं सूचयतीति गमने प्रति विलंबो न कार्य इति भावः। तदुक्तं वसंतराजे। कालासु वीस्य पि दर्शनेन हंसस्य शब्देन च सर्वसिद्धिरिति। मरालो राजहंसः। अस्या मराले हंसमातृक इति धरणिः। निकारः स्यात्परिभवे धान्यस्योत्करणेपि चेति च॥ अजन्यमप्युद्दीपनं प्रकारद्वयेनाह तरुणीजनानां मोहनं मोचयतीति त्रायन मोहजनकं मधुरिपोः श्रीकृष्णस्य रावं शब्दं करकमलेन करोमि। चरणमहमागी मेता सिविदूरमिसा दिनि मधुराणि संभाषणानि महामधुरमोहनसद्गनस्वरग्राममूर्छनातानतालरागैरालापितसद्गुणसंकेतिवेणुनादं वा श्रृणु आकर्णय। कीदृशं रमणीयतरं अतिशयेन रमणीयं। अतो तरुणीजनमोहनं मधुपविरावमिति पाठे मधुपानां भ्रमराणां विविधप्रकारेण सा ॥८५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेराधिकेरूपेणाधिकेरूपेणाधिको सकलव्रजांगनातिशायित सौंदर्येण मोहितव्रजेंद्रनंद
नो।अथवा।स्वमाधुर्यवर्षिण्यापंचमादिस्वरेण वावशीकृतकृष्णा।वर्णितिंचमगवस्त्रिय।
कृष्णसारहरपंचमस्वरेमुंचगीतकुतका।निराधिके।प्रक्षतेत्र हरिणानुधावता।वांनयाचद
तिभीषणेजनइति।रहस्यत्वाद्रूपेचेत्येकाक्षरः।मधुमथनं मधुमधुराख्यरसकंमम्नाति
विलोडयतितत्तथा।तं शृंगाररसस्वादचतुरमित्यर्थः।अथवा।मधुमथनंभ्रमरवल्ल।
द्रसास्वादलंपटंतं।अथवा।मधुवसंतंतस्तंमथ्नाति दृक्षोभयतिसःस्मरः।तकंदर्पकोटि
सुंदरंअनुसराभिनुगच्छ।कीदृशं।अनुगतंतचसौदर्यलावण्यादिना

चिरगीत चाटुवचनरचनं चरणे रचित प्रणिपातं।संप्रति मंजुलवंजु
लसीम नी केलिशयनमनुयातं॥१॥मुग्धे मधुमथनमनुसर राधि ॥टी॥

के अनुकूल्येन त्वां अनुसृतस्तं।अथवा।कामेनाधिकरुतिराधिके शृंगारस्वभावइत्यर्थः।
रस्तु कामइत्येकाक्षरः।मधुवसतं।अथवा।कासुन संवर्तो भावेनत्वद्वशीभूत्वानुगतंसं
केतस्थाने प्रियंअनुसर।क्रीडाभवेत्यर्थः।वसंतस्योद्दीपनविभावात्।अथवा।हेराधि
के अनुसारनत्वनाहूता कथंव्रजामीतिचेद् तत्राह।मधुनामाचिदूषको यं समागतस्तेनम
त्स्थानसरेत्यर्थः।ध्रुवपदं।अनुगतत्तुमेवाह।विरचिताविहिताचाटुप्रियोक्तिं।ममप्राण
कोटिवल्लभात्वमेवासि।प्रसादनरचन।मयापिव्रजसुंदरीकदंबमपिनतुल्यामि।इत्यादि
वचनकदंबस्यरचनासंदर्भोयेनतादृशं।पुनःकीदृशं।तवचरणारविंदेरचितःप्रणिपा
पातोचनतिर्येनतादृशं।अथवातवानयनामनर्मचरणेनरचितःप्रणिपातोयेनतादृशंच
रणेसंकेतार्थाभिमुखगमनार्थमितिवा।विविधानुनयपूर्वकेन मत्क्रियाकथनामरचितपदौ

पादानांतर्हिंसंप्रतिकुत्रास्मास्तकाद्य

Dr. Urmila Sharma Collection, Varanasi

गीत० ।।८४।।

गोविंद०

संप्रतीति। संप्रत्यधुना मंजुलो मनोहरो यो वंजुलो वेतसः तस्य सीमनि पर्यन्ते व्यक्तो
कलति कान्ते ति यावत्। यत्केलिशायनं क्रीडाशय्या तामनुलक्षीकृत्य यातं गतं तत्रस्थः त्वां
प्रतीक्षत इत्यर्थः। वंजुलादीनामुद्दीपनविभावत्वेन परिगणनात्। तो सहृदयं तीत्वर
यति।।१।। घनेत्यादि। हे सखि त्वं हे श्रीकृष्णमुपगच्छ। कथं यथा स्यात्। एवं पुनः कथं
यथा स्यात्। दरेण साध्वसेन मन्थरश्चरणे विहारः पदविन्यासो यत्र। एवं यथा स्यात्। तत्र हे
तु गमनविलम्बेन संबाधयति घनयोर्निबिडयोर्जघनस्तनयोर्भारस्य भरोति त्वायोग्य
स्वात्तात् किंच मरालानां हंसानां स्वकीयमन्थरागमनेन मंजीरादिशब्देन च निकारं तिरस्का
रं विधेहि कुरु। संप्रति मरालेषु श्लाघ्यमानेषु सत्सु मंजीरादिध्वनिरपि मरालत्वा

घनजघनस्तनभारभरे दरमन्थरचरणविहारं। मुखरितमणिमंजीर
मुपैहि विधेहि मरालनिकारं।। अ।। श्रृणु रमणीयतरं तरुणीजनमोहन
मधुरिपुरावं। कुसुमशरासनशासनवंदिनि पिकनिकरे भज भावं।।२।।

त्वस्यैव लक्षे प्राप्स्यति। संप्रति यो यो ऽपि साक्षात् इति ध्वनितं। अथ च हंसवाहनो यात्रायां शुभं सूचय
तीति गमने प्रति विलम्बो न कार्य इति भावः। तदुक्तं वसन्तराजे। कालासु वास्यपि दर्शनेन हंसस्य
शब्देन च सर्वसिद्धिरिति। मरालो राजहंसः स्यात् मराले हंसमात्रक इति धरणिः। निकारः स्यात् स्व
भवे धान्यस्योत्करणे पिवेति च।।अ।। अन्यमप्युद्दीपनं प्रकारद्वयं यति। तरुणीजनानां मोहनं मोहु
यतीत्यायनमोहजनकं मधुरिपोः श्रीकृष्णस्य रावं ध्वं करकमलेन करोमि। चरणमहमागमि
तासि विदूरमित्यादिनि मधुराणि संभाषणानि महामधुरमोहनसद्गुणस्वरग्राममूर्छनातान
तालरागैरालापितं सगुणसंकेतिवेणुनादं वा शृणु आकर्णय। कीदृशं रमणीयतरं अतिशयेन रमणी
यं। अतः तरुणीजनमोहनं मधुपविरावमिति पाठे मधुपानां भ्रमराणां विविधप्रकारेण सा...।।८५।।

CC0. In Public Domain, Digitizagtion by eGangotri

असासत्वास्वादयतिरतिमधुपः श्रीकृष्णःतस्यविविधानुनपालापमितिंमधुपस्रावेनापिप्र
मरम्ले मणतद्रसलापदयेनहृणःगानपरत्वेचकथितेनथाचश्रीभागवतेमधुरयागिरेति।
कोस्त्रीतिचापिकनिकटे कोकिलसमूहे।कुसुमस्त्राससनवंदिनिसति।कुसुमान्येवस्त्रा
सनंधनुर्यस्यतादृक्षः कामःतस्यस्त्रासनेनदाज्ञातयावंदिनिस्त्रावकेसति।अथवा।कुसु
मस्त्रासनेवंदितुंनमस्कर्तुंशीलमस्यतादृशो।कामाज्ञाकारिणिसतीत्यर्थः।भावंश्रीकृष्णे
नुरागंभजलआम्रपाञ्जयवा।कामानुयात्राव्हायमानेपिपिकेरेभवमभिप्रायंभजाभिकनि
र नेदृश्कलावद्धिकोंसप्रियतमसेभो।गांवसरेमिपिकादीनास्तिभिवंप्रकटीकुर्विसर्थः।वंदिन
स्तायकाद्रस्मरः।अत्रापिपिकरेणसंकारेणश्रीकृष्णस्यमधुरस्वरोयात्रायोगीतवाद्यवत्

अनिलतरलकिसलयनिकरणलतानिकुरंवः।परा।
णवमिवकरभारूकरोतिगतिंप्रतिमुंचविलंवं।।अ॥ ५॥

करभःकनिष्ठिकामणिवंधपर्यंतंकरस्यबहिर्भागतद्वन्निभोस्तौऊरूयस्यास्तारन्दृशोग
तिगमनंप्रतिविलंबंकालक्षेपंमुंचत्यज।अनिलेनवायुनातरलश्चंचलोयःकिसलयनि
करःनवपल्लवसमूहःतस्वरूपेणकरेणलतानिकुरंवंलतासमूहस्तवप्रेरणमिवकरो
ति।किसलयकंपच्छलेनासमंजसमसहमानोलतासमूहोपित्वांप्रेरयतीतिविलंवेनका
र्यइतिध्वनितं।शाकुनशास्त्रेच।वामेवंधुरवाक्यक्षीरवृक्षःपल्लविनोग्रतः।अनुकूलावह
न्वायुःप्रयाणेशुभसूचकइति।समूहेनिकुरंवमस्त्रियामित्यमरः।मणिवंधादाकनि
ष्ठंकरस्यकरभोवहिरित्यमरः।प्रयोनामोलंकारः।४।अपिस्फुरितमिति।अस्फुटं कुमंस्त
मसमीनयाच नकलत्रंपृच्छासखीसमीचीनाबंदति।प्रसंकुरु।कीदृशं।स्फुरितंसकंपकस्मादिवअने
गतरंगवशादिव।अनंगस्यकामस्ययःस्तरंगःऊर्मिरितिदृशादिव।अनंगतरंगेस्यनेनतस्याः
रसतरंगिणीत्वमाक्षिप्यते।अन्योपिकुंभोनद्यांतरंगैःप्रर्यमाणःसंकपोभवतीति।अयमपि

पिकुल्वकुमः।रुचिरसमानरागिण्यौककनंग वाकुनमिदृशपिध्वनितांग्रहा।
गरकौः प कंपनवन्तिवेकृशधि।

Dr. Urmila Sharma Collection, Varanasi

गीत०
॥१८८॥

रणादिवसकंपइतिभावः। इत्थं श्लोकोत्रास्तेक्षाद्योतकः। पुनः कीदृशी। मनोहरो यो मुक्ताहारस्त
स्यएवविमलानिर्मलाजलधारा यत्र तादृशी। तत्र स्तनोपरिस्थितस्य हारस्य जलधारात्वेनि
रूपणात् स्तनस्य पूर्णकलशत्वेन निरूपणमाक्षिप्यते। पूर्णादिच कलशा ततरंगेरांदोलने
सति बहिर्जलधारा निःसरणसंभवात्। पुनः कीदृशी। सूचितो हरेः श्रीकृष्णस्य विरहता
पहरणाद्धरिरिति। परिरंभ आलिंगनं येन तादृशी। नारीणां स्तनः कंपः प्रियसंगमं सूच
यतीति शाकुनिका। तदुक्तं। नित्संनायां स्तने कंपः प्रियसंगमसूचक इति। पूर्णकलशत्वे
लेन निरूपणमिति यात्रायां पूर्णकलशदर्शनं शुभमिति सूचनायां॥७॥ सख्याः सकाशात्
ज्ञेती प्रत्याह। अधिगतमित्यादि। इदं तव वपुः सखीभिः अतिशयेन रतिरणाय सुरत
संग्रामाय सज्जं कृतालंकरणादिसविधानमधिगतं ज्ञातं। अथवा सखीभिरिदं तव वपुः

स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं। पृच्छमनोहरहारविम
लजलधारममुं कुचकुंभं॥७॥ अधिगतमखिलसखीभिरिदं
तव वपुरपि रतिरणसज्जं। चंडि रसितरशनारवडिंडिममभिसर सरसमलज्जं

बहुभारतिरणे सज्जमधिगतं। इदानीं तासा का लज्जेति भावः। अतो हे चंडि रतिरणरंगक
र्कशे अलज्जे निःशंकं सरसं सोत्साहं। अथवा रसः श्रृंगाररसस्तत्सहितं सरागं वा। रसितः शब्
दायमानः कृतो रशनायाः कांच्या रवो ध्वनिः डिंडिमो वाद्यविशेषो यत्र एवं यथा स्यात्तथा अ
भिसर। श्रीकृष्णाभिमुखं सुरतरणसंकेतभूमिमुपेहि। अन्यत्रापि सोत्साहरणे डिंडिमस्ता
ड्यते एवेति ध्वनितं। अभिसरमेति पाठे अलज्जं लज्जारहितं श्रीकृष्णेन सह सुरतं निधेहि।
मो सेना दोलज्जाया अनुपयोगत्वात्। अलं ज्ञमिस्थलं किंचो कुचिदाम नेपदं नोपिपरस्मै
पदिनं एवं यथा चलं ह्वाध्योधा राधाभिद्यादि। चल ह्वाध्याधीमित्येतत्तदंगं सिंहरीकायां
प्रमाणीकृतं। तथैवावामिति पदं ज्ञेयं। तत्र क्रियापि विशेषणं। सरे समिति हावभा
वमेरीयितकुटमिसैर भिरसः श्रृंगाररस सहितेयथा स्यादेवं पुनः कथं यथा स्यात्। रसितरश

गो० टि०
नारवडिंडिमं यथा स्यात्तथा केलिजनितविपरीतसुरतमिति ध्वनितानतु
सखीभिः कज्जामितत्राहसितमिति ज्ञातं वातावितर्कवानकार्यं
इति भावः॥८॥
॥१८८॥

CC0. In Public Domain, Digitizagtion by eGangotri

तदेवाह। स्मरेत्यादि। हे सखी मचलं व्यस्त लीलं लीला सहितं यथा स्यादेवं चलग०॥ कीदृ
शेन करेण। स्मरस्य कामस्य ये शराः तस्तदृशा भगा सुंदरः नखाय स्मिन् तादृशेन। अन्यस्मि
न्नपि रणे शस्त्राणि भवति अत्र रतिरणे तु नखा एव स्मरशास्त्राणि इति भावः। अपि च
वलयक्वणितैः कंकणशब्दैः हरिमपि निजगति शीलं स्वयगामस्वभावस्वरूपं। अथ
यामति शासि। शील चरित्रं अवबोधय ज्ञापय। अन्यत्रापि समीचीनो योद्धा प्रतिभटम
वहितं कृत्वा सुध्यते इति ध्वनितं। निगदितशीलमिति पाठे कथितस्य भावमित्यर्थः। ७
श्रीजयदेवेत्यादि। इदं श्रीजयदेवेन भणितं हरिविनिहितमनसा हरौ विनिहितं तस्म
रं मनो येषां। तादृशां नाम चिरामं अनवरतं कंठतटीं अधि च सतु। कंठ

स्मरशरसुभगनखेन सखी मचलं वलकरेण सलीलं। मल वलयक्व
णितैरवबोधय हरिमपि निजगतिशीलं॥ ७॥ श्रीजयदेवभणितम
धरीकृतहारमुदासितवामं। हरिविनिहितमनसामधितिष्ठतु कं

देशो य सखीत्यर्थः। कीदृशं। अधरीकृतः स्वगुणैर्हीनः कृतो हारो येन तादृशं। पुनः कीदृ
शं उदासिता स्वमाधुर्येण तिरस्कृता वामा येन तादृशं। अविराममिति भणितस्य वि
शेषणं वा। कीदृशो निरामित्यर्थः। कंठस्थितस्य हारस्य रामायाश्च विषयिणां शोभात्र
दर्शनं सम्यक् दत्तं भवति। श्रीजयदेवस्य भणितं महत्तमैः कंठे धृतं एतस्य माधुर्यास्वा
दनेन तयोस्तिरस्कारो जायत इति भावः॥ ८॥ ॥ इति श्रीगीतगोविंदे चिंत्रः प्रबंधः
॥ २०॥ ॥ अस्याष्टपद्यनंतरं चत्वारः श्लोकाः॥ सा मां द्रक्ष्यति॥ १॥ अक्ष्णोर्निक्षि
का श्मीरगो० हारावली० ४॥ ततमंजुतरे अष्टपदी एवं सततितम् श्लोकः। एकोनसत
त तिश्लोकानंतरं लिखिताः त्ते अत्र ज्ञेयाः। दिचगीतिमाह। मंजुतरेति। गीतस्यास्य वराटी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागः। मंठतालः। गीतार्थस्तु। हे राधे माधवसमीपं श्रीकृष्णांतिकं प्रविश। इह मंजुतरकुं
जतलकेलिसदने। मंजुतरं यत्कुंजतलं निकुंजाभ्यंतरं तदेवैकं केलिसदनं क्रीडामंदिरं
तत्र विलस विलासं कुरु। कीदृशि। रतिरभसेन रसरूपात्कामादेन हसितं हास्ययुक्तं वदनं य
स्यास्तत्संबोधनं। रतिरभसहसितेति पठे तस्यासौ रतिरभसहसितवान्। श्रीकृष्णः
तस्य जनः प्राणो यस्याः सा तत्संबोधनमिति वा। श्रीकृष्णस्य प्राणरूपे इत्यर्थः। अथ
वा। इह निलकुंजे प्रविश्य माधवसमीपं विलस संभोगं कुरु। हे मंजुतरकुंजतलकेलि
सदने। मनोहरतरं कुंजतलमेव क्रीडागृहं यस्याः सा तादृशि।।

मंजुतरकुंजतलकेलिसदने प्रविश राधे माधवसमीपमिह
विलस रतिरभसहसितवदने।।१।। नवलसदशोकदलशयने
सारे। प्रविश राधे माधवसमीपमिह निलसकुचकलशतरलहारे।।२।।

अथवा इह माधवे विलस कीदृशे। मंजुतरकुंजतलकेलिसदनं यस्य तादृशे पुनः की
दृशे। रतिरभसेन हसितं वदनं यस्य तादृशे। प्रविश राधे माधवसमीपमिह विलस
इति ध्रुवपदं प्रतिपदमनुवर्तमानत्वात्। माधोभात् साध्वसोदयीनिधानं इत्यर्थः।
वल्लभायाः संभोगमेनिरवधिसौंदर्यप्रकटनं। माधवं पदमुपातं। कुंजतरपाठे प्रश
स्तकुंज इत्यर्थः।।१।। अपि च नवलसदिति। कीदृशे केलिसदने। नवनूतनं लसच्छो
भायमानं यदशोकदलं अशोकपत्रं तन्निर्मितं शयनं शय्या तदेव सारे युवतीनां
तादृशे माधवसमीपं प्रविश। शय्यायां विलसेत्यर्थः। एवं [illegible] व्याख्यायो जावेत्रा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विलसति। कीदृशि। कुचकलशयोः स्तनकुंभयोः तरलश्चंचलो हारो यस्यास्तादृशि। अप
रस्मिन्नपि विलासगृहे महाघनं तिष्ठतीति ध्वनितं। कुचकलशतरलहारे इत्यनेन विप
रीतसुरतं सूचितं। अत्र कलश हारयोः संयोगारंभे मंगलाचरणमिव ध्वनितं। अथ
वा नवलसदृशो कदलैः श्रीकृष्णनिर्मितश्चाध्यायो सारः श्रेष्ठो यस्याः सा प्रधान
निर्बंधाः तस्य सर्वस्वरूपो इत्यपि तस्या एव संबोधनं। अथवा तादृशाध्यायनमेव सारो
यस्यास्तादृशि। अथवा हे माधवे विलसस दृशो कशाध्यायां च रंगनायाः महाघने।
पुनः कीदृशे पुरुषकर्तसंभोगादौ खलु कुचकलशयोः उपरि चचलो हारो यस्य सादृशो अ
शोकदलपदेन नाशोषविरहदुःखहानिस्तानंदावाप्तिश्च भविष्यतीति ध्वनितं॥२॥ ॥

कुसुमचयरचितशुचिवासगेहे। ज०। मिह विलस कुसुमसुकुमारदेहे॥३॥

कुसुमचयेति। इह कुसुमच्चयेन पुष्पसमूहेन विचित्रवितानैर्विविधमंडनादिभिः शुचिमनुप
हतं अनुपभुक्तं। अथवा शुचिः शृंगारः तस्यरूपं शृंगारप्रथानानां भोग्ययोग्यं वा। श्रीकृष्ण
ने निर्मितं तत्र श्रीगार्थं या सगृह लीलागृहं तत्र विलास। कीदृशि। कुसुमादपि सुकुमारो देहो
यस्यास्तादृशि। अथवा हे माधवे विलस कीदृशे कुसुमच्चयेन राचित शुचिवासो गेहं ये
न तादृशे। पुनः कीदृशे। अथवा कुसुमचयेन रचितं अर्थाच्छ्रीकृष्णेन आवासगृहं यस्यास्तादृ
शी इति संबोधनं। प्रविशा राधे न प्रकृष्टो विसरः प्रणयः आसम्यग्‌ गधः कंपः प्रकृष्टरसोद्दीप
कारकाः। तथा च तादृशाध्यायरचनेन तस्य लघिमा वः तत्समीपे उदित सात्विकविकारेति
विलसेत्यर्थः। युद्धधंकपने तयेतोयप्रसरः प्रणयेन गोविसरः प्रसस बुजेति विघ्नः। हे कुसु
मसुमारदेहे। कौपृथिव्यां सुशोभिनाम्यशोभामानशोभा यस्य स्य कुसुमः श्रीकृष्णः तस्य सु
कुमारं सुतरां कुः अभीप्सितत्वनाश्रयो मारः कामः तद्रूपो देहो यस्यास्तादृशि। श्रीकृष्णास्ति

कामिनीमनोहरटीका

Dr. Urmila Sharma Collection, Varanasi

